॥ ओ३म् ॥
श्रुत्या यदुक्तं परमार्थमेतत्
तत्संशयो नात्र ततः समस्तम्
श्रुत्या विरोधे न भवेत् प्रमाणं
भवेदनर्थाय विना प्रमाणम्
ब्रह्मविद्योपनिषद् - 32

प्राणिनामवधस्तात !
सर्वज्यायान् मतो मम।
अनृतां वा वदेद्वाचं न तु हिंस्यात कथंचन्॥
महाभारत, कर्ण पर्व - 69/23

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
'सर्व एव नरा मोहाद्,
दुराशापाशपाशिनः।
दोषगुल्मकसारंगा, विशीर्णा जन्मजंगले॥'
(योगवासिष्ठ 1/26/41)
मृत्युव्याधिजराधर्मा
मृत्युव्याधिजरात्मभिः ।
रममाणो ह्यसंविग्नः
समानो मृगपक्षिभिः ॥
(बुद्धचरित - 4/89)

卐 वर्षम्-१३ 卐 अंकः-२१ (३०९) नवदेहली 卐 १ मईमासः २०२४तः १५ मईमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## केन्द्रियसंस्कृतविश्वविद्यालयस्य श्रृंगेरीपरिसरे वार्षिकोत्सवे जगद्गुरुणा श्री श्रीविधुशेखरभारतीमहास्वामिना शास्त्राध्ययने शास्त्रवैदुष्ये च संस्कारमहत्त्वं प्रतिपादितम्

दिल्ली (श्रृंगेरी),अजय कुमार मिश्रा। केन्द्रीय संस्कृत विश्वविद्यालयस्य फरतया श्री राजीव गान्धी परिसरे ,श्रृंगेर्यां वार्षिकोत्सवे अनन्तश्रीविभूषितजगद्गुरोः श्री श्रीविधुशेखर भारतीमहास्वामिनः पावनसमुस्थितौ सोत्साहं भव्यतया समाचरिते दिव्य समारोहे केन्द्रीय संस्कृत विश्वविद्यालय ,दिल्लीतः कुलपतिः प्रो श्रीनिवास वरखेड़ी सारस्वतातिथि रुपेण काशी हिन्दू विश्वविद्यालय, वाराणसीतः तेलुगु विभागस्य आचार्य चिल्ला रामचन्द्रमूर्तिः मुख्यातिथि रुपेण समुपस्थिताः । एतान् अतिरिच्य परिसर निदेशकः प्रो हंसधर झा अन्ये संकाय सदस्यः अधिकारिणः कर्मचारिणः उपस्थिताः । महास्वामिना शास्त्राणां निरन्तरं संरक्षणे संबर्धने च विश्वविद्यालयस्य प्रयासाः प्रशंस्य उक्तं यत् संस्कृत वाङ्मयस्य प्रचारेण प्रसारेण न केवलं भारतस्य , अपितु विश्वस्य कल्याणं भविष्यति ।

सारस्वतातिथि रुपेण कुलपति प्रो श्रीनिवास वरखेड़ी कथितवान् यत् पूज्यस्य श्रीविधुशेखर भारती महास्वामिनः श्रृंगेरी पुण्यभूमिस्थे परिसरे दिव्योपस्थितिः अस्माकं परम सौभाग्यमेव । मम कृते तदर्शनं सर्व कार्यक्रमेषुमें सर्वाधिकं महत्त्वपूर्णं यतः बीज रक्षया एव शास्त्र रक्षा भविष्यति यथा भगवत्पादसानिध्यात् यथात्र संभवम्। प्रो राघवेन्द्र भट्टः प्रो वेंकट रमण भटः इत्येताभ्यां संकाय सदस्याभ्यां मञ्चसञ्चालनं कृतम्। व्याकरण विभागस्य आचार्य द्वारा धन्यवाद ज्ञापनं विहितम्।



परिसरस्यास्य विगत वर्षाणां राष्ट्रियराज्यस्तरीयाकादमिक सांस्कृतिकोपलब्धीनां मंचस्थ विशिष्टातिथीनां समक्षं प्रस्तुतीकरणं जातम्। विविध शिक्षा स्थानेषु प्राप्त स्वर्ण पदकच्छात्रच्छात्राश्च अपि पुरस्कृताः।




## देशे रामराज्यस्य आदर्शाः मूल्यानि, प्रतिमानानि च संस्थापितानि-स्वामी रामदेवः

हरिद्वारम्। शक्ति, मर्यादाष साधना इत्येषां महापर्व चौत्रनवरात्रं रामनवमीम् उपलक्ष्य ऋषिधर्म वेदधर्म संवाहकः परमपूज्यः योगऋषिः स्वामी रामदेवमहाराजः 30तमे संन्यास दिवसे श्री गोविन्ददेव गिरिमहाराजस्य श्रीमुखाद्हिन्दवी स्वराज प्रणेतुः छत्रपति शिवाजी महाराजस्य यशोगाथा ष्छत्रपति शिवाजी महाराज कथा' समापनं जातम्। तत्र स्वामी रामदेवः आचार्य बालकृष्णश्च देशवासिभ्यो रामनवमीशुभकामनाः दत्तवन्तौ व्यासपीठं प्रणमन् गोविन्ददेव गिरिः कथां प्रारब्धुम् प्रार्थितः।

ष्छत्रपति शिवाजिकथा समापने पूज्य स्वामी गोविन्द देव गिरिणा उक्तं रामायणस्य महाभारतस्य च सर्व गुणानाम् एकत्रसमुच्चयः शिवाजी महाराजः।

कार्यक्रमे स्वामी रामदेवः कथाद्देश्यं प्रतिपादयन् उक्तवान् यत् शौर्य, पराक्रमः प्रचण्ड पुरुषार्थः शिवाजिना कृतः अस्माभिरपि प्रचण्ड पुरुषार्थेन देशवासिषु गौ-मातुः, भारत मातुश्च रक्षा करणीया अखण्डभारतनिर्माणं करणीयम्।

अवसरेस्मिन् आचार्य बालकृष्णः कथितवान् यत् अय राम नवम्याः पावन पर्व हभगवान् श्री रामो जीवने प्रसन्नता, उल्लासं, निरोगतां जीवनस्य सम्पूर्ण प्रसन्नतां च प्रददाति। पतंजलि योगपीठस्य अभिभावकानां, संकल्प शिल्पिनां श्रद्धेय स्वामिनां 30तमः संन्यास दिवसः अद्य विद्यते।

अवसरेस्मिन्भारतीय शिक्षा परिषदः कार्यकारी अध्यक्ष श्री एन.पी. सिंहः, पतंजलि विश्वविद्यालयस्य प्रति-कुलपतिः प्रो. महावीर अग्रवालः, मानविकी संकायाध्यक्षा साध्वी आचार्या देवप्रिया, आचार्यकुलस्य उपाध्यक्षा डॉ. ऋतम्भरा, पतंजलि योगपीठस्य क्रय समित्यध्यक्षा भगिनी अंशुल, संप्रेषण विभागाध्यक्षा भगिनी पारूल, भारत स्वाभिमानस्य मुख्य केन्द्रीय प्रभारी भाई राकेशः 'भारत' स्वामी परमार्थदेवः, मुख्य महाप्रबंधकः (समितिः) ब्रिगेडियर टी.सी. मल्होत्रा, आचार्यकुलस्य प्रधानाचार्या आराधना कौलः, पतंजलि विश्वविद्यालयस्य आई.क्यू.ए.सी. सैलस्य अध्यक्षः प्रो. के.एन.एस. यादवः, कुलानुशासक स्वामी आर्षदेव सहिताः सभी शिक्षण संस्थान यथा- पतंजलि गुरुकुलम्, आचार्यकुलम्, पतंजलि विश्वविद्यालयः पतंजलि आयुर्वेद महाविद्यालयः इत्येषां प्राचार्यगणः विद्यार्थिगण , पतंजलि संन्यासाश्रमस्य संन्यासिनः भ्रातरः साध्व्यः पतंजलि योगपीठेन सम्बद्धाः समस्त एकांशिका प्रमुखाः, अधिकारिणः कर्मचारिणश्च उपस्थिताः।

## "लग्नभावफलविचारः" इति विषये विशिष्टव्याख्यानस्य आयोजनं जातम्

डॉ.दिनेशः चौबे, उज्जयिनी, उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य ज्योतिषविभागस्य तत्त्वावधाने एप्रिल मासस्य 27 तमेदिनाङ्के सायं ४ वादने 'लग्नभावफलविचारः' इति विषये आभासीपटलमाध्यमेन विशिष्टव्याख्यानस्य आयोजनं कृतम्। मुख्यवक्तृरूपेण श्रीसोमनाथसंस्कृत विश्वविद्यालयस्य, वेरावलस्य, गुजरातस्य ज्योतिषविभागस्य सहायिकाचार्या डॉ. अपूर्वाअग्रवालमहोदया लग्नस्य परिभाषाखगोलीयस्थिती, कुण्डलीविधानस्य सम्यक् गणितीय एवञ्च फलितीय पक्षाणाम् उपस्थापनेन साकं आचार्यपराशरः, मन्त्रेशादिप्राचीन आचार्याणाम् उद्धरणं, त्रिकदोषस्य निवारणं, शारीरिकसुखस्यभावः, वृत्तिप्राप्तिः इत्यादि विषये प्रमुखतया उद्बोधितवती। कार्यक्रमसंरक्षकः माननीयः कुलगुरुः आचार्यः विजयकुमारसीजीमहोदयः ज्योतिषशास्त्रस्य वैज्ञानिकपक्षनामुपरी सभां संबोधितवान्। सत्राध्यक्षता ज्योतिषविभागाध्यक्षेन डॉ. उपेन्द्रभार्गवमहोदयेन विहिता। स्वागतभाषणं डॉ. योगेशकुमारेण संचालनं डॉ. पवनकुमारमिश्रमहोदयेन धन्यवादज्ञापनञ्च डॉ. रूपेशकुमारमिश्रेण कृतम्। व्याख्यानकार्यक्रमे देशस्य- विदेशस्य च बुद्धिजीविनः, छात्राः, शिक्षकाः च वर्चुअल् प्लेटफॉर्म Zoom App इत्यस्य माध्यमेन कार्यक्रमे सम्मिलिताः अभवन्। कल्याणमन्त्रेण सेः कार्यक्रमस्य समाप्तिः अभवत्।

# प्रशासनेतरे बाल-भारतीपब्लिकविद्यालये वार्षिक-सांस्कृतिक-कार्यक्रमस्य भव्यायोजनम्'

नवीना दिल्ली। ऐषमः अप्रैल-विंश्यां सर गंगाराम हॉस्पिटल मार्गस्थिते प्रतिष्ठिते बालभारती पब्लिक विद्यालये दशम्याः कक्षायाः वार्षिकः सांस्कृतिकोत्सवः हर्षोउल्लासपूर्वकं समनुष्ठितः। कार्यक्रमे मुख्यातिथिरूपेण विद्यालयस्य एव प्राक्तन हिन्दी शिक्षिका वन्दना शर्मा वर्या, रसायन-विज्ञानस्य पूर्वशिक्षिका अंजु






मारवाहमहोदया च उपातिष्ठताम्।

कार्यक्रमस्य शुभारम्भः प्रधानाचार्येण श्रीयुतलक्षवीरसहगलेन उपप्रधानाचार्यया श्रीयुतया विनीताध वनवर्यया समेतैः समुपस्थितैः अतिथिभिः, अभिभावक-शिक्षक-संघस्य मुख्य-सदस्यैः पूर्वच्छात्रसंघस्य सदस्यैः च दीप-प्रज्वालनेन कृतम्। दीप-प्रज्वालनस्य समये नवम-कक्षायाः छात्र-छात्राभिः सम्भूय वैदिक-लौकिक-मन्त्राणाम् उच्चारणं कृतम्। अस्मिन् वार्षिके कक्षागते सांस्कृतिक-समारोहे छात्रैः विद्यालयस्य कुलगीतिकापि भव्यरूपेण प्रस्तुता। तत्पश्चात् संगीतस्य छात्रैः भव्या सांगीतिकी प्रस्तुतिः सम्प्रस्तुता, पुनः अभिप्रेरणात्मक-गीतस्य मनोमुग्धकरी प्रस्तुतिः अपि जाता। अस्मिन्नेव क्रमे दशम्याः कक्षायाः छात्रेण जीतेन महाभारताधारिता एका सुदीर्घा शौर्यपूर्णा हृदय-झङ्कारिणी हिन्दी कविता संश्राविता, श्रोतृणां मनांसि च विजितानि। एकया जयागुप्तया छात्रया आङ्गलभाषायां स्वरचिता कविता प्रस्तुता, एतस्य पश्चात् चतुर्षु युगेषु दुरापन्न द्वन्द्वेषु अर्थात् युद्धेषु आधारितं सामूहिक-नाट्यस्य अभिमञ्चनमपि जातम्। बालानां नाट्य-मञ्चन-प्रस्तुत्या अतिथीनां अभिभावकानां शिक्षकजनानां च का हृदयानि प्रसभं मोहितानि। अतिथि-वक्तव्य -प्रस्तवन-समये श्रीमती वन्दना-शर्मा प्रावोचत् यत् अद्यतने समारोहे प्रस्तुताः सर्वे सांस्कृतिकाः कार्यक्रमाः सर्वश्रेष्ठाः आसन्। कार्यक्रमं सफलीकर्तुं छात्र-छात्राभिः समं शिक्षक-शिक्षिकाभिः कृतः भृशं परिश्रमः। कार्यक्रमस्य साफल्यं तेषामेव परिश्रमस्य फलमस्ति, अतः इमे सर्वे छात्राः शिक्षकाः च साधुवादस्य पात्राणि सन्ति। युगपदेव अमुना प्रोदितं यत् प्रधानाचार्यस्य सफल मार्गदर्शने विद्यालयः निरन्तरं विद्यार्थिनां सर्वांगीण-विकासार्थं सदैव प्रयासरतो वर्तते। अपरा अतिथिः अञ्जू मारवाह वर्या अपि निजे वक्तव्ये बालानां सुष्ठुशिक्षया साकामेव सुसंस्काराणां शालीनतायाश्च सद्गुणानाम् आधाने एतादृशानां सांस्कृतिक-कार्यक्रमाणां महत्वपूर्ण-भूमिका प्रत्यपादयत्।

कार्यक्रमस्य अन्ते दशम्याः कक्षायाः समन्वयिका वरिष्ठ-शिक्षिका च श्रीयुता सतविन्दर कौर महोदया वार्षिक सांस्कृतिक-कार्यक्रमस्य आयोजने योगदान-कृतवतां विद्यालयस्य समेषां शिक्षक-शिक्षिकानां महत्वपूर्णावदानार्थं तान् प्रति आभारं व्यक्तीकृतवती। कार्यक्रमस्य समापनं च राष्ट्रगीतेन साकं सञ्जातम्।

# संस्थानद्वारा आभाषिकप्रेरणा सत्रं समायोजितम्

लखनऊ - (श्रीदिव्यरञ्जनः)उत्तरप्रदेश संस्कृत संस्थानम् लखनऊ द्वारा ओनलाइन संभाषण योजनान्तर्गत संचालितानां प्रथम द्वितीय श्रेणीनां भाषा शिक्षण कक्षा शिक्षार्थिभ्यः प्रेरणा सत्रम् आयोजितम् । निदेशकः विनय श्रीवास्तवः कथितवान् यत् संस्कृतमध्येतुं शिक्षार्थिनः प्रेरणीया अनिवार्यतया यत्कृते प्रशिक्षण



प्रमुखस्य सुधिष्ठ मिश्रस्य परिकल्पनायां सत्रमिदं समायोजितम् ।

सर्वेक्षकः भगवानसिंहचौहानः कथितवान् यत् सत्रे वक्तृत्वेन यूक्रेन देशः वास्तव्य त्रिविक्रम दासः परम्परागत अध्ययनेन विनापि न होने संस्कृतस्य प्रथित विद्वान् तदीय मार्गदर्शनेन शिक्षार्थिषु उत्साहस्य संचारो जातः।

तेन स्वीयम् अध्ययन गत अनुभवमुपस्थाप्य स्वाध्यायस्य महिमा मंडनं विधाय छात्राः भाषा शिक्षणार्थं प्रेरिताः । छात्राः अनुभव कथनं, गीतं, कथा इत्यादीनां माध्यमेन प्रतिभा प्रदर्शनमकुर्वन्।

समन्वयकः धीरज मैठाणी विषयोपस्थानम्, अतिथि स्वागतं राजनदूबे विष्णु कुमारपः सत्र सञ्चालनं च कृतवान्। विशेषतया सत्र समायोजकाः दीपमाला, जीवन प्रकाश तिवारी, सत्यममिश्रः परिकल्पकौ दिव्यरञ्जनराधाशर्माणौ च अवर्तन्त। एतैःसहितास्तत्र षड्वादने संचालित कक्षाणां शिक्षार्थिनः संस्थानस्य पदाधिकारिणः , ऋषभपाठकः, कार्यलयीयसहायकः शान्तनुमिश्रः शिवम गुप्ता च समुपस्थिताः आसन्।

---

# गृहेगृहेसंस्कृतयोजनान्तर्गतम् अप्रेलमासीयभाषाशिक्षण-कक्षाणां सामूहिकं समापनम् अभूत्

लखनऊ (गोपालकृष्णमिश्रः) भाषाविभागः उत्तरप्रदेशशासनाधीनेन उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितायाः गृहे-गृहे संस्कृतम् इति योजनान्तर्गतानां द्वादश दिवसीयसरलसंस्कृतभाषाशिक्षणकक्षाणाम् अद्य सामूहिके समापनसत्रे सत्रे निदेशकमहोदयस्य अभिनन्दनं विधाय तस्यैव अनुमत्या सत्रमिदम् आरब्धं। सर्वप्रथमं



वैदिकमङ्गलाचरणं शिक्षकः देवदत्तशर्मा कृतवान्। मातरं सरस्वतीं समाराधयितुं सरस्वतीवन्दनां खुशबु अकरोत्। संस्थानगीतिकां गातुं शिक्षिकां श्वेता अग्निहोत्री मधुरेण कंठेन गीतिकां गीतवती।

सर्वेषां स्वागतं स्वागतगीतम् अगायत् नीतूआचार्या। अनुभवकथनं ज्ञानेश्वरत्रिपाठ्यङ्कितकुमारौ अवदताम्। ततः योजनासंरक्षकाः संस्थानस्य नेतृत्वकर्तारः, प्रतिक्षणम् योजनायै प्रेरणादातारः, समग्रे उत्तरप्रदेशे संस्कृतध्वजस्य उत्तोलकाः भाषाविभागीय-उत्तरप्रदेशशासनाधीनस्य उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकपदं समलङ्कुर्वाणाः श्रीमन्तः विनयश्रीवास्तवमहोदयाः स्वोद्बोधनेन शिक्षकाणां मार्गं प्रशस्तीकृतवन्तः।सर्वदा आभाषिकमाध्यमेन संस्कृत सम्पत् सम्पादनशीलाः सर्वशास्त्रनिष्णाताः व्याकरण केसरिणः प्रबलप्रशासनिकाः डॉ जगदानंद झावर्याः संभाषणस्य शिक्षणगतवैशिष्ट्यं प्रत्यपादयत्। योजनारूपपरिवारस्य मुख्यः सर्वदा अपि प्रेरणाप्रदाता, समग्रसम्भाषण-योजनां सञ्चालयितुं चिन्तनशीलः तस्य च क्रियान्वयने प्रबन्धनेन च तत्परा अस्याः गृहे-गृहे संस्कृतम् इति योजनायाः प्रमुखः भगवानसिंहचौहानः अधिसत्रं समुपस्थाय स्वीयैः वचोभिः अनुगृहीतवान्। योगप्रयोगपुरोहितादिषु राष्ट्रवैभवं साधयितुं तत्परः व्याकरणादिविषयेषु कृतपरिश्रमः संस्कृतभाषाविद्वान् कक्षाशिक्षणे मार्गदर्शनं कुर्वन् श्रीमान् दिव्यरंजनः शिक्षकैर्विहितकार्यं समीक्ष्य अग्रे अवधातुं निर्दिष्टवान्। ततः परं नित्यनिरन्तरम् ऊर्जाया : स्फूर्त्या सह संलग्नः अस्याः योजनायाः निरीक्षणे तत्परः समन्वयकरुपेण कार्यं कुर्वन् श्रीमान् अनिलगौतमः सत्रे समागतेभ्यः पदाधिकारिभ्यः केन्द्राध्यक्षेभ्यश्च धन्यवादान् विज्ञापितवान्। सञ्चालिका मोहिनी उक्तवती यद्भवताम् अतिथीनां पदाधिकारिणां समन्वयकानां च मार्गदर्शने, सर्वेषां समुपस्थितानां संस्कृतानुरागिणां शिक्षकबान्धवानां सहभागितया केंद्राध्यक्षाणां सहयोगेन, ओनलाइन प्रशिक्षकाणाम् उपस्थित्या च सत्रमिदं सम्पन्नम्। अन्ते सत्रस्य परिसमाप्तये नीतूसक्सेना शान्तिमन्त्रमपठत्।

---

# शताधिकसम्भाषणशिविराणां लक्ष्यमुद्दिश्य प्रान्तसमीक्षायोजनागोष्ठ्याः समापनम्

हरिद्वारम् ।(वार्ताहरः-कुलदीपमैन्दोला) संस्कृतभारती-उत्तराञ्चलस्य दिनद्वयस्य प्रान्तसमीक्षायोजनागोष्ठी शनिवासरे समारभत् । यत्र हरिद्वारे श्रीचेतनज्योति -आश्रमे प्रान्तसमीक्षायोजना-गोष्ठ्याः आरम्भः सरस्वती-मातुः पुरतः दीपप्रज्ज्वलनेन अभवत् हरिद्वार- जनपदाध्यक्षः डॉ. अरुणमिश्रमहोदयः वेदध्वनिं शुभारम्भेस्मिन् कृतवान्। मुख्यातिथि- रूपेण अखिलभारतीय- सहसंघटनमन्त्री श्रीजयप्रकाशगौतममहोदयः संगठनस्य



लक्ष्यम्मुद्दिश्य उक्तवान् यत् सर्वत्र संस्कृतं भवतु तदर्थम् अस्माकं कार्यं संस्कृतसम्भाषणरूपेण अग्रे जायमानः अस्ति। संस्कृतभारत्याः प्रयासेन ग्रामतः आरभ्य अखिलभारतीयस्तरे च विदेशे जनाः अधुना संस्कृतेन सम्भाषणं कुर्वन्तः सन्ति। विशिष्टातिथिरूपेण श्रीचेतनज्योति- आश्रमस्य परमाध्यक्षाः महन्त-ऋषेश्वरानन्द महाराजः उक्तवान्। अ.भा.सं.मन्त्रीजयप्रकाशवर्यः उक्तवान् यत् संस्कृते सर्वेषां स्पर्शः भवेत् यक्षःष्अग्रे रविवासरे प्रान्तसमीक्षायोजनागोष्ठ्याः समापनसत्रेस्मिन् प्रान्ताध्यक्षाद्वारा कथितं यत् वयं मिलित्वा संस्कृतकार्यम् अग्रे वर्धयामः च विभिन्नस्थानेषु सम्भाषण- शिविरायोजनेन संस्कृतं प्रसारयामः । अखिलभारतीय- संगठनमन्त्रिणा जयप्रकाशवर्येण उक्तं यत् संस्कृताय अस्माभिः समयः दातव्यः तथा च परस्परं संवादः सम्मेलनं अपि आवश्यकं। अस्माभिः संस्कृतेन सर्वेषां स्पर्शः भवेत् तेन लालनं संरक्षणम् अपि भवति। सर्वेषां स्मरणम् आवश्यकं। दृष्टिः। निर्माणरूपेण आवश्यकी । अवसरेस्मिन् विद्वत्-परिषद्-प्रमुखः श्रीदिनेशचन्द्रशास्त्री,गीताशिक्षणप्रमुखः, अरविन्दनारायणमिश्रः, प्रकाशचन्द्रजांगी, प्रकाशचन्द्र उप्रैती, जगदीशचन्द्रजोशीः जगदीशपाण्डेयः, रोशनगौडः, प्रदीपसेमवालः, वाणीभूषणभट्टः, इतेन्द्रनैथानी, कुलदीपमैन्दोला, पूर्वकार्यालयप्रमुखः मनीषबडथ्वालः, धीरजमैठाणी, माधवपौडेलः, आनन्द जोशी इत्यादयः उपस्थिताः आसन् । उत्तराखण्डस्य त्रयोदशजनपदेभ्यः खण्डशः जनपदशः विभागशः प्रान्तीयाः दायित्ववन्तः कार्यकर्तारः हरिद्वारे समीक्षार्थम् एकत्रिताः अभवन् ।उत्तराञ्चलप्रान्तस्य संस्कृतभारत्याः दिनद्वयस्य प्रान्तसमीक्षायोजनागोष्ठ्याम् उत्तराखण्डस्य त्रयोदशजनपदेभ्यः खण्डशः जनपदशः विभागशः प्रान्तीयाः दायित्ववन्तः कार्यकर्तारः हरिद्वारे समीक्षार्थम् एकत्रिताः अभवन् । यत्र विभिन्नसत्रेषु गतवर्षस्य कार्याणां समीक्षा अभवत् च आगामीवर्षस्य नूतनयोजनाकार्यक्रमाणां समीक्षा अभवत् । यत्र विभिन्नसत्रेषु गतवर्षस्य कार्याणां समीक्षा अभवत् च आगामीवर्षस्य नूतनयोजनाकार्यक्रमाणां समीक्षा अभवत्। चर्चाविशेषे श्रीजयप्रकाश महोदयः, श्रीप्रेमचन्द्रशास्त्री, श्रीमतीजानकीत्रिपाठी, गिरीशतिवारी, गौरवशास्त्री, हरीशगुरुरानी इत्यादिभिश्च अखिलभारतीयस्तरे प्रान्तस्तरे जनपदस्तरे खण्डस्तरे जायमानानाम् च सम्भाव्यमानानां कार्यक्रमाणां समीक्षा कृता च सर्वव्यस्थायाः कृते सर्वेषां मार्गदर्शनं कृतं। उत्तरदायित्व रूपेण संस्कृतभारत्याः कार्यकर्तृभ्यः नूतनपदम् अपि प्राप्तं। शताधिकसम्भाषणशिविराणां लक्ष्य मुद्दिश्य प्रान्तसमीक्षायायोजनागोष्ठ्याः समापनम् अभवत्। कार्यकर्तृणां संकल्पेन गृहं गृहं प्रति प्राप्स्यति संस्कृतम्।

# बृहत्तरभारतस्य सीमाप्रसङ्गविमर्श:

– डॉ. लक्ष्मीकान्तविमल:, नवदेहली

नवदेहल्यां स्थितेन श्रीशंकरशिक्षायतन-वैदिकशोधसंस्थानेन मार्चमास्य ३० तमे दिनांके सायंकाले पञ्चवादनत: सप्तवादनपर्यन्तम् अन्तर्जालीयमाध्यमेन 'बृहत्तरभारतस्य सीमाप्रसङ्गविमर्श:' इति विषयमवलम्ब्य एकां राष्ट्रियां संगोष्ठीं समायोज्यत। विषयोऽयं पण्डितमधुसूदनओझामहोदयस्य इन्द्रविजयनामकस्य भारतवर्षाख्यानस्य अन्तर्भूत: अस्ति। भारतीयवाङ्मये भारतवर्षस्य या बृहत्तरा सीमा सुवर्णिता अस्ति तेषां समेषां प्रसंगानाम् एकत्र प्रमाणपुरस्सरेण ग्रन्थकारै: ओझावर्यै: ग्रथितै:।

कार्यक्रमे मुख्यातिथिरूपेण विराजमाना: झारखण्डप्रदेशस्य जमशेदपुरनगरस्थस्य नेताजीसुभाषविश्वविद्यालयस्य कुलपतिवर्या: प्रो. गङ्गाधरपण्डामहोदया: स्वकीये वक्तव्ये प्रतिपादितवन्तो यद् इन्द्रविजयग्रन्थस्य प्रथमप्रक्रमान्तर्गते तृतीय: सीमाप्रसङ्ग: विद्यते। तत्र चतुर्दशप्रमाणानि सुगुम्फितानि सन्ति। पण्डामहोदयै: प्रथमप्रमाणत: चतुर्दशप्रमाणपर्यन्तं संक्षेपेण विषयस्योद्घाटनं कृतम्। तै: प्रतिपादितं यत् भारतवर्षस्य सीमाप्रसङ्गे ग्रन्थकार: लिखति यत् भारतवर्षस्य सीमाया: द्विधा विभाग: अस्ति। पौरस्त्यं पाश्चात्यञ्च। द्वयो: सीमयो: विभाजक: सिन्धुनदी अस्ति। यथोक्तं ग्रन्थकारेण–

**'पौरस्त्यं पाश्चात्यं भारतवर्षं द्विधाकृतं भवति ।**
**अनयोरस्तिविभाजक एष नद: सिन्धुरिति विद्यात्।।'**, इन्द्रविजय:, पृ. २२

अस्यां संगोष्ठ्यां त्रयो वक्तार: सीमाप्रसङ्गे ओझावर्यै: भारतवर्षस्य सीमाविषयकयो: पौरस्त्यपाश्चात्य-विभागयो:प्रदत्तेषु चतुर्दशप्रमाणेषु एकैकं प्रमाणमधिकृत्य स्वकीयं व्याख्यानं प्रदत्तवन्त:।

प्रथमवक्तृरूपेण दीनदयालउपाध्याय-गोरखपुरविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागस्य सहायकाचार्या: डॉ. सूर्यकान्तत्रिपाठिवर्या: इन्द्रविजयग्रन्थस्य सीमाप्रसंगान्तर्गतं षष्ठं प्रमाणम् अङ्गीकृत्य व्याख्यानम् अकुर्वन्। पुराणे भुवनकोश: विद्यते। तेषु भुवनकोशेषु गान्धार- मद्र- पारद- पह्लव- कम्बोज- शक-यवनादिदेशनामानि उल्लिखितानि सन्ति। एते देशा: उत्तरदिशायां विद्यन्ते स्म। भुवनकोशे उल्लेखत्वात् ते एते देशा: भारतवर्षीया: भवितुम् अर्हन्ति। यथोक्तमोझावर्यै:–

'पौराणिके भुवनकोशे भारतवर्षीयावान्तरदेशीय- परिगणनासूदीच्यदेशतया गान्धार-मद्र- पारद- पह्लव- कम्बोज- शक-यवनानि- देशानाम् उल्लेखादेषाम् देशानां पुरायुगे भारतीयत्वम् उपगम्यते।',तत्रैव, पृ. १००

द्वितीयवक्तृरूपेण बिहारप्रान्तस्य छपरानगरस्य जयप्रकाशविश्वविद्यालयस्य संस्कृतविभगाध्यक्षा: प्रो. वैद्यनाथमिश्रमहाभागा: इन्द्रविजयग्रन्थस्य सीमाप्रसंगान्तर्गतदशमं प्रमाणम् उररीकृत्य व्याख्यानं कृतवन्त:। दशमप्रमाणस्य विषय: अस्ति त्रिपुरासुरस्यवध: तथा पृथिव्यां लौहपुरस्य परिचय:। त्रिपुरासुरस्य प्रसंग: श्रुतिग्रन्थेषु ब्राह्मणग्रन्थेषु पुराणेषु समुपलभ्यते। पुराणेषु अपि मत्स्यपुराणे विस्तारेण अवलोक्यते।

'श्रौतग्रन्थे ब्राह्मणाख्ये पुराणे मत्स्यादौ वा त्रैपुराख्यानमुक्तम् ।' तत्रैव, पृ. ११९, का. १

ग्रन्थकार: पण्डितओझामहोदय: स्वयं प्रश्नम् उपस्थापयति। यत् प्राचीने काले यथा देवानां पुरत्रयम् आसीत।तथा एव असुराणाम् अपि पुरत्रयम् आसीत। त्रिषु पुरेषु कुत्र त्रिपुरासुर: निवासम् अकरोत्। इयं शंका मनसि समुपद्यते–

**'आसीत्सुराणां च पुरत्रयं पुरा यथासुराणां त्रिपुरं व्यधीयत् ।**
**कुत: स एकस्त्रिपुरासुरोऽभवत् प्रसिद्ध इत्यत्र न वेद्मि कारणम् ।।'**,

तत्रैव, पृ. १२०, का. ५

तृतीयवक्तृरूपेण श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य न्याविभागस्य आचार्या:प्रो. महानन्दझामहोदया: इन्द्रविजयग्रन्थस्य सीमाप्रसंगान्तर्गतसप्तमं प्रमाणं स्वीकृत्य व्याख्यानं प्रस्तुतवन्त:। पौराणिके भुवनकोशे उल्लिखितस्य मद्रदेशस्य महर्षि: काप्य: निवासी आसीत्। तस्य प्रमाणं यजुर्वेदस्य वाजसनेयशाखायाम् लभ्यते–

'तथाहि वाजसेयश्रुतौ उद्दालक आरुणिर्याज्ञवल्क्यं प्रति सूत्रात्मानम् अन्तर्यामिणं च पृच्छन्नाह– 'मद्रेष्ववसाम पतञ्जलस्य काप्यस्य गृहेषु यज्ञमधीयाना:' ते हीमे यज्ञवेदाध्यापकस्य काप्यस्यर्षेनिवासप्रदेशा मद्रा:।',तत्रैव पृ. ११३

संगोष्ठ्या: अध्यक्षात्वेन विराजमाना: जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत-प्राच्यविद्याध्ययनसंस्थानस्य आचार्या: प्रो. सन्तोषकुमारशुक्लमहोदया: स्वकीये आध्यक्षीये उद्बोधने कथितवन्त: यत् इन्द्रविजयग्रन्थे सीमानिर्धारणस्य द्विधा कारणम् अस्ति। राज्यशासनव्यवस्था भौगिलिकस्थितिश्च। शासनद्वारा या सीमा निर्धार्यते सा सीमा अनित्या। यतोहि यो राजा राज्यं करोति स: स्वशासनकाले पूर्वव्यवस्थां नवीकृत्य स्वनाम्न: नूतनव्यवस्थाया: स्थापनं करोति। यथोक्तं ग्रन्थकारेण–

'इह हि भुवनकोशे देशविभाग: द्विविधा निरूप्यन्ते- राज्यशासनव्यवस्थिता: भौगोलिक-गणितव्यवस्थिताश्च। तत्र शासनकृतविभागा अनित्या अव्यवस्थिता: काले काले विभद्यन्ते। ये देशा येन राज्ञा जीयन्ते, ते तदायत्तनामरूपा: पूर्वापेक्षया क्वचिदन्येन नाम्ना निर्दिश्यन्ते। अत एव तु भारतीयानामिमे गान्धारदेशा अफगानिस्थानशब्देन, हिङ्गला देशा: प्रथमं सुगदियानाम्ना पश्चाद्बिलोचिस्ताननाम्ना व्यवह्रियन्ते स्म।', तत्रैव पृ. १३९

संगोष्ठ्या: प्रारम्भ: श्रीलालबहादुरशास्त्रिराष्ट्रिय- संस्कृतविश्वविद्यालयस्य शोधछात्रेण श्रीप्रवीणकोइरालामहोदयेन कृतेन वैदिकमङ्गलाचरणेन सञ्जात:। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. मणिशंकरद्विवेदी कृतवान् धन्यवादज्ञापनञ्च डॉ. लक्ष्मीकान्तविमल: अकरोत। वैदिकशान्तिपाठेन संगोष्ठ्या: समापनं सञ्जातम्। अस्मिन् कार्यक्रमे विविधेभ्य: प्रान्तेभ्य: विश्वविद्यालयस्य महाविद्यालयस्य च आचार्यै: शोधच्छात्रै: विषयानुरागिभिश्च सोत्साहं प्रतिभागिता कृता।

# भारतवर्षस्य अभिनवा सीमा

– डॉ. लक्ष्मीकान्तविमल:

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन अप्रैलमासस्य ३० तमे दिनांके सायंकाले ५ वादनत: ७ वादनपर्यन्तम् अन्तर्जालीया राष्ट्रिया संगोष्ठी समायोजिता। अस्या: राष्ट्रया: संगोष्ठ्या: विषय: पण्डितमधुसूदनओझामहोदयस्य प्रणीतस्य इन्द्रविजयस्य प्रथमप्रक्रमस्य सीमाप्रसङ्ग: आसीत्। सीमाप्रसङ्गे चतुर्दशप्रमाणि विलसन्तितराम्। अस्यां संगोष्ठ्याम् एकादशप्रमाणत: चतुर्दशप्रमाणपर्यन्तं भारतवर्षस्य य: अभिनव: सीमाविचार: कृतो विद्यते तस्यैव चर्चा समागतै: विद्वद्भि: कृता ।

श्रीलालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वेदविभागस्य आचार्या: प्रो. सुन्दरनारायणझामहाभागा: मुख्यवक्तृरूपेण स्वकीयं विषयं प्रस्तुतवन्त:। ते चतुर्दशप्रमाणम् अङ्गीकृत्य प्रतिपादितवन्त: यत् पौराणिके भुवनकोशे देशस्य विभाग: द्विधा विद्यते। राज्य-शासन-व्यवस्थिता: भौगोलिक-गणित-व्यवस्थिताश्च। समये समये शासनस्य परिवर्तनं भवति। शासनपरिवर्तननेन स्थानस्य नाम, राज्यसीमा परिवर्तयति। यथा कश्चित् ग्राम: अधुना उत्तरप्रदेशे अस्ति राज्यस्य पुन:सीमाकरणात् उत्तराखण्डे समायाति। इयं शासनव्यवस्था अस्ति। अत एव अनित्य: अव्यवस्थित: च। भौगोलिकव्यवस्था सर्वदा सर्वथा नित्या एव भवति। अनया युक्त्या भारतवर्षस्य सीमा नित्या अस्ति।

श्रीलालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य व्याकरणविभागस्य आचार्या: प्रो. दयालसिंहमहोदया: वक्तृरूपेण स्वकीयं विषयं उद्घाटितवन्त:। ते द्वादशं प्रमाणम् उररीकृत्य अवोचन् यत् तुरुष्कदेशस्य माध्यमेन भारतवर्षस्य सीमा निर्धारिता अस्ति। अयं तुरष्क: त्रिधा विभक्त: अस्ति-स्वर्ग:, अन्तरिक्षं पृथ्वी इति। एतादृश: विभाग: म्लेच्छैरपि कृत:। अस्मिन् समये रुसदेश: समुद्रस्य पूर्वस्य दक्षिणस्य भागे विद्यते। तथैव तुरुष्क: देश: अपि समुद्रस्य दक्षिणे भागे पश्चिमभागे विद्यते। यथा तुरुष्कस्य भागद्वयम् अस्ति यथा रुसदेशस्य भागद्वयम् अस्ति। तथैव भारतवर्षस्यापि सिन्धुस्थानं पारस्थानं द्विधा विभाग: समुपलभ्यते। इलाहाबादविश्वविद्यालस्य संस्कृतविभागस्य सहाचार्या: डॉ. विनोदकुमारवर्या: त्रयोदशं प्रमाणं स्वीकृत्य व्याख्यानं कृतवन्त: । तै: प्रतिपादितं यत् मार्कण्डेयपुराणे भुवनकेशे भारतवर्षं समुद्रत्रयेण परिविष्टितम् अस्ति।

एतत्तु भारतं वर्षं चतु:संस्थानसंस्थितम् ।
दक्षिणापरतो ह्यस्य पूर्वेण च महोदधि:।।
हिमवानुत्तरेणास्य कार्मुकस्य यथागुण:।

अनेन उद्धरणेन सिध्यति यत् भारतवर्षस्य दक्षिणे भागे, पश्चिमे भागे, पूर्वभागे समुद्र: एवं च उत्तरे भागे हिमालय: अस्ति। पश्चिमे भागे समुद्र: अस्ति अस्य सङ्गति: केन विधिना स्यात। अत एव ग्रन्थकार: लिखति- पारस्याखात-समुद्रो लोहितसमुद्रो भूमध्यसमुद्रश्च अस्य पश्चिमेऽवधि: साधीयान् संभाव्यते।

हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्या: डॉ. कुमदीपकुमारमहोदया: एकादशं प्रमाणम् आधारीकृत्य कथितवन्त: यत् पुराणे वर्णिते भुवनकोशे भारतवर्षस्य सहस्रयोजनं परिमाणम् अस्ति। मत्स्यपुराणात् प्रमाणम् उल्लिखति ओझावर्य:–

योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तर:।
आयतस्तु कुमारीतो गङ्गाया: प्रवहावधि:।।

मारकण्डेयपुराणे–

योजनानां सहस्रं वै द्वीपोऽयम् दक्षिणोत्तरम्।

सामान्यतया योजनशब्दस्य चत्वार: क्रोशा: भवन्ति। परन्तु अस्मिन् प्रसङ्गे योजनशब्दस्य अर्थ: क्रोश: एव स्वीकर्तव्य:।

श्रीलालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वेदविभागस्य अतिथिरूपेण सहायकाचार्येण डॉ. ओङ्कारसेलुकरमहोदयेन वैदिकमङ्गलाचरणेन संगोष्ठ्या: प्रारम्भ: सञ्जात:। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमल: कृतवान्। अस्मिन् कार्यक्रमे विविधेभ्य: प्रान्तेभ्य: विश्वविद्यालस्य महाविद्यालस्य आचार्या: शोधच्छात्रा: विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रु:।

# संस्थानस्य प्राथमिकतायां सम्मिलिता अधिपङ्क्ति संस्कृतभाषाशिक्षण कक्षा

लखनऊ - (दिव्यरञ्जन:) ओनलाइन संभाषण योजनान्तर्गत संचालित संभाषण कक्षासु आयोजिते प्रेरणा सत्रे वक्ता श्री लाल बहादुर शास्त्री केंद्रीय संस्कृत विश्वविद्यालय देहल्या: साहित्य विभागीय: सहायक आचार्य: डॉ अनमोल शर्मा गीताया: पद्यानां माध्यमेन संस्कृतस्य वैज्ञानिक महत्वं प्रतिपाद्य शिक्षार्थिभ्य: प्रेरणां दत्तवान् । संस्कृत ध्वनि विज्ञानं विशेषतया व्याख्यातवान् । निदेशक: विनय श्रीवास्तव: यत् संस्थानस्य प्राथमिकतायां सम्मिलितया ओनलाइन संस्कृत भाषा शिक्षण कक्षया अनेके छात्रा लाभान्विता:। डॉ दिनेश मिश्र:, डॉ जगदानंद झा, श्री महेंद्रपाठक: इत्यादि पदाधिकारिणां परामर्शेन योजना इयं फलीभूता। प्रेरणा सत्रेषु समागत विद्वांस: छात्राणाम् उत्साहं वर्धयन्ति।



सर्वेक्षक: भगवानसिंहचौहान: अकथयत् यत् प्रशिक्षण प्रमुखस्य सुधिष्ठ मिश्रस्य परिकल्पनायां सत्रमिदं समायोजितम् अस्ति। तेन प्रेरिता: शिक्षार्थिन:अन्यान् जनानपि कक्षासु योजयन्ति।

छात्रा:अनुभव कथनं, गीतं , कथा इत्यादि द्वारा प्रतिभा प्रदर्शनमकुर्वन्। कक्षा प्रबन्धनं समन्वयका: धीरज मैठाणी , दिव्यरञ्जन:, राधा शर्मा च संलग्ना: । विशेषतया छात्रै: सत्रेस्मिन् प्रतिभा प्रदर्शनं कृतम् । मञ्चसञ्चालनं डा०सत्यप्रकाशमिश्र:, विषयोपस्थापनं धनञ्जय मिश्र:, अतिथिपरिचयं स्वागतभाषणं डा० दिवाकरमिश्र:, धन्यवादज्ञापनं विनय प्रकाश तिवारी च अकुर्वन् । छात्रेषु मङ्गलाचरणं सत्यप्रकाशमिश्र शास्त्री , सरस्वती वंदनाम् आराधना रावत:, संस्थानगीतिकां रेखातिवारी,स्वागत गीत-ज्योतिलक्ष्मी बेलागुर, अनुभवकथनं डॉ० राघवेन्द्र कुमार मिश्र:, डा०रेखा, डा०भागीरथी मिश्र, सामयिकविचारान् , राजीवप्रकाश दूबे, अंते शान्तिमन्त्रं शालिनी श्रीवास्तव:, संस्कृतगीतानि संगीता सिंह:, मोनिका सैनी , वैशालीमिश्रा च उपास्थापयन। तत्र कार्यालयस्था: पदाधिकारिण:, ऋषभपाठक:, वीरेंद्रतिवारी, शिवम गुप्ता , कार्यालयसहायक: शान्तनुमिश्र: च विशिष्टतया समायाता:। आभाषिक रूपेण आयोजित सत्रे समस्त कक्षाणां शिक्षार्थिन:, संस्कृत प्रेमिण: सामाजिका: जना: समुपस्थिता: आसन् ।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

संस्कृतसंवादस्य अयमंकः भवद्भ्यः सादरं समर्प्यते। सम्पूर्णे संसारे मानवतायाः स्वरो मुखरीक्रियमाणो वर्तते। मानवजीवनोत्थानाय ये नैतिकगुणास्तेषां ह्रासेन या दशा विश्वस्य दृश्यमानास्ति सा भयंकरी। ये ये गुणा मानवविकासाय आवश्यकास्तेषां तीव्रगत्या ह्रासः सर्वत्र अकस्मान्न जातः, अपितु शनैश्शनैरेव। मनुष्यः दानं दयां सहयोगं परोपकारं सौजन्यम् औदार्यं विस्मृत्य स्वार्थ्यायैव निरन्तरं चरन् वर्तते। हन्त! महदाश्चार्यम्! स्वार्थपूर्त्ये स किं किं न कुरुते? प्रकृतिं दूषयति, स्वजनान् वंचयति, पशून् घातयति, मित्राणि छलयति, गुरूनपि न विजहाति। अहो! कलिनर्तनम्! किन्तु अस्यामेव परिसस्थितौ अनेके सज्जना अअपि भवादृशः सन्ति ये निरंतरं समाजसेवायै संलग्नाः परोपकारमेव कुर्वन्ति। धन्या भवन्तः सज्जनाः येषामवदानेन महीयं सुखमवाप्नोति। सत्युक्तं केनापि नीतिकारेण

सूर्यस्तपति सत्येन वायुः सत्येन वाति च।

सत्येन धार्यते पृथ्वी सत्यं सर्वत्र राजते॥

मन्ये अयमेव भावस्तस्य महोदयस्येति। किन्तु सर्वथा सत्यमेतत् वंचकानां लुण्टाकानां समाज एव दानिनः परोपकारिणो भवन्ति। ये रामादिवत् प्रवर्तन्ते। येषां सर्वत्रमानो विधीयते। अस्मिन् भयंकरे कोरोनाकाले एते एव सज्जनाः परोपकारं कुर्वन्तः राष्ट्रसेवामकुर्वन् कुर्वन्त्यपि। येन विषाणुरयं प्रयातीवेति। परन्तु असावधानता न विधेया, सर्वकारस्य निर्देशाः अक्षरशः पालनीयाः। येन स्वास्थ्यमुत्तमं स्यात्। स्वस्थ एव जनः समृद्धराष्ट्रस्य निर्माणं करोति।

भवन्तः साहित्यकाराः अनवरतं कवितयालेखेन संवादेन समाजं जागरयन्तीति को न जानाति संस्कृतसंवादपाठकः अतः भवतां समेषामादरणीयानां योगदानमवेक्ष्य भारतीया संस्कृतिरपि मोदमवाप्नोति। संस्कृतभाषापि महीयते। अहं मन्ये यदवश्यमेव संस्कृतसंवादस्य लघुप्रयासेन एकस्मिन् दिने महत्परिवर्तनं भविष्यति, येन सर्वे देशभक्ताः निजसंस्कृतिं संस्कृतं प्रति बद्धादरा भविष्यन्ति। भगवन्तं शिवं मानसेन पूजयन्ती विश्वकल्याणं कामये।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥'

'The Divinity is One. The sages call It by varied names like Indra,Mitra, Varuna, Agni and well-winged Garutman.

The Rig Veda 1.168.46

'आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे॥'

'Let auspicious works, that take us, unimpeded and unmolested, to a higher level in life, come to us from all sides. May the gods, that do not obstruct our progress but grant protection to us day by day,be ever with us for our advancement.'

The Rig Veda 1.89.1

'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥'

'Speech or Vac is measured out in four forms and at four levels:Para, Pashyanthi, Madhyama and Vaikhari. The first three of them remain hidden and inaudible within us.The wisest alone know all the four while common men know only the last one, Vaikhari."Para lies at the deepest level and is verily the unmanifest Supreme Being in the form of Sabda Brahman. It is pure consciousness."Pashyanti is the latent, unspoken thought that springs from the Unmanifest and is visualized, within self,by seers. It is the internal intent of speech. And when this transforms itself into an intellectual process in the form of thoughts in mind, it is called Madhyama. In this intermediate stage, words give shape to thoughts arrayed in sequence. It isa pre-vocal, internal speech or voice of silence. Vaikhari is the articulated speech-the verbal expression of thoughts. It is the spoken word.

The Rig Veda 1.164.45

संकलन : एस.वासुदेव रावः

# मङ्गलवाक्

राजकुमारमिश्रः 'कुमारः'
सहायकाचार्यः, साहित्यविभागः,
हरियाणासंस्कृतविद्यापीठम् ।

लोके यः प्रथते गिरा मधुरया सद्भावभव्यश्रिया
लोकानां हृदयं सदैव हरते यस्सिद्धकाव्यश्रिया ।
सम्पन्नो विभवेन यस्सुमनसा पत्न्या च राजश्रिया
सोऽयं भात्यधुनाऽभिराजसुकविर्विद्वत्सु पद्मश्रिया ॥

संस्कृतसाहित्ये सन्ति अनेके स्वदलप्रचारिताः स्वदलमात्रप्रथिताः कवयो महाकवयश्च । येषां कवित्वं सरस्वत्याः संस्कारयोगप्रसूतया प्रतिभया न प्रकाशते प्रत्युत सायासेन अभ्यासादिसाधनेनैव । अभ्यासमात्रोद्भवा प्रतिभा अन्या संस्कारसङ्गमा प्रतिभा चान्येति विन्दन्ति काव्यान्तारसस्वादसुखानुभवसाक्षिकाः। संस्कारवशोद्भवा प्रतिभा इदानीं केवले तस्मिन् भवति अभिराजराजेन्द्रमिश्र एव विलोक्यते, अन्येषु तु सायासिकी प्रतिभैव। वस्तुतो यथापरम्परं सारस्वत्यां धरायामेक एव कविर्भवति, अन्ये तु तत्कालजीविनः प्रायेण कवीयितारो भवन्ति।

साम्प्रतिकं संस्कृतकविसमाजं वीक्ष्य मनो भृशं दुःख्यति, यदत्र अनेके प्रतिभादरिद्राः कविम्मन्याः कीर्तिं प्राप्तुं स्वदलं निर्मान्तो दरीदृश्यन्ते, ते च 'अहो रूपमहो ध्वनिः' इतिन्यायेन परस्परं प्रशंसन्त आत्ममुग्धाश्च भवन्तो दृश्यन्ते । किन्तु जनानां सा कीर्तिः का? या अचिरस्थायिनी भवेत्, या स्वसंबद्धं जनं न जीवयेत् । अहन्तु प्रायेण सर्वान् सामयिकान् कवीन् ध्यायेन पापठ्ये,किन्तु यादृशं भाववैभवं यादृशं च भाषाशुद्धताजन्यचमत्कारप्राज्यसाम्राज्यम् अध्यभिराजेन्द्रमिश्रकाव्यम् अनुबोभूये तत्सादृश्यलेशोऽपि अन्यत्र अरण्यसौधदर्शनमिव मन्ये। स्पृहयन्तु बहवः स्वार्थलोलुपा दलबद्धेभ्यः कविम्मन्येभ्यः तेभ्यः, किन्तु अहं स्पृहयामि अभिराजराजेन्द्रमिश्रं तदीयसारस्वतोन्नतवैभवसाक्षात्कारेण । अभिराजः तादृशो रचनाकारः, यो हि प्राचीनपरम्परापरिपोषे सदैव उद्यतो वर्तते अभिराजकाव्ये भारतीयस्वरो भारतीयचेतना भारतीयमूल्यं परम्परापरिपोषे युगानुरूपो नवाविष्कारश्च प्रतिपदमनुस्यूतं वरीवृतीति। अभिराजोऽहर्निशं सारस्वतसेवायां समयाकुर्वन् विपुलयति सारस्वतोद्यानम् । 'नहि कस्तूरिकामोदः शपथेन विभाव्यते' इतिधिया अभिराजीयगुणाः काव्यस्य वास्तवमूल्यवेत्तृजनेषु स्वत एव प्रचरन्ति, यत्परिणामतः केचन सहृदयाः समये समये अभिराजगुणेभ्यः प्रभाविताः स्वविचारं विविधशैल्या क्वचित् प्रशंसापत्रलेखनेन क्वचित् श्लोकादिमाध्यमेन वा प्रकटयन्ति । मयाऽपि अभिराजस्य साहित्यं निस्वार्थभावेन विषयीकृत्य दशप्रायाणि शोधपत्राणि विविधाश्च तत्प्रशस्तिपरा भावकविता व्यलेखिषत। इदानीं मम मित्रं डॉ. अरविन्दकुमारतिवारी 'अभिराजचरितम्' इतिनामकं महाकाव्यं प्राणयत् । अरविन्दद्वारा 'अभिराजचरितम्' इति महाकाव्यप्रणयनं मन्ये संस्कृतवाङ्मये काचिदपूर्वैव घटना । यतोहि कस्यचित् कवेः तज्जीवनावधावेव कोऽपि अपरः कविः तस्मिन् आस्थया महाकाव्यं सृजेदिति एतादृशी घटना मन्ये संस्कृतवाङ्मये कदाचिदितःपूर्वं घटिता न स्यात् । प्रायेण कोऽपि कविः कमपि स्वकालीनं गुणविशिष्टं समाजादर्शं जनं नायकीकृत्य विविधखण्डकाव्यमहाकाव्यादिप्रबन्धैः कवते, किन्तु स्वयुगीनः कविः स्वयुगीनं कविं बहुदूरकथानिर्वाहबन्धनेन महाकाव्येन कवेत, इति न श्रुतम् !, किन्तु मम मित्रमणिना अरविन्दकुमारतिवारिणा तद् अजातकार्यं विधाय मन्ये वीरायितमेव । वस्तुतोऽत्र अभिराजस्य लेखनीचमत्कारकारणम् । येन सर्वे प्रभाविता भूत्वा निजाशयं प्रकटयन्त्येव । भगवती सरस्वती अरविन्दकुमारतिवारिणा 'अभिराजचरितम्' इतिसंज्ञम् अष्टसर्गात्मकं महाकाव्यं व्यलेखयदिति प्रमोदस्य विषयः संस्कृतजगतः । अरविन्दकुमारतिवारी इदानीं स्वयोग्यतया अनवरतसारस्वतसपर्यया च विद्वत्सु प्रथतेतमाम् । कविरयमरविन्दः सदैव वरिवस्यति गुरून् श्रेष्ठान् आचार्यान्, यत्फलेन अस्मिन् गुणानां सन्निपातोऽस्ति उदितः । एतत्प्रणीतम् 'अभिराजचरितं' वस्तुत एतदीयनिर्मलहृदये अभिराजं प्रति विद्यमानानां मणिसम्मितोदात्तनिर्मलभावानां प्रकाशनस्थानम् । अस्मिन् काव्ये अभिराजस्य जीवनस्य विविधाः पक्षा उद्घाटिता वर्तन्ते, यान् केवलम् अभिराजः तदीयान्तेवासिनो नर्ममित्राण्येव च विदन्ति, काव्येनैतेन ते पक्षा अमरतां प्रापिताः । काव्यस्यास्य प्रथमे सर्गे कविनाऽनेन नाके सुरसंवादमाध्यमेन भुवः क्षीयमाणं संस्कृतं वीक्ष्य तदुद्धर्तुं च देवैर्नाकस्थो महाकविः कालिदासो भूयोऽपि सुरगवीमुद्धारपदवीमानेतुमित्थं प्रार्थितः-

सोऽयं भवान् कविवरः पुनरेकवारं
श्रीकालिदास भुवि गच्छतु संस्कृतार्थम् ।
नान्यः समोऽस्ति भवताऽतुलकाव्यसिन्धो
लब्ध्वाभिराजपदवीं जयतात् त्रिलोकम् ॥

देवप्रार्थनया महाकविकालिदास इत्थम् अनुमतभूयोभूजन्मा जायते-

ओमित्युवाच सुकविर्गलितान्तरात्मा
मञ्चागतो विधिचितस्स तु कालिदासः ।
नूनं प्रभो सशपथं भुवि देववाणीं
पर्यट्य साग्रहमहं नितरां तनिष्ये ॥

इतिपर्यन्तं कथावस्तु चित्रितं यच्च कविप्रौढिक्तिसिद्धम् ।

द्वितीये सर्गे अभिराजस्य भारतोत्तरप्रदेशे जौनपुरजनपदे जन्म चित्रितम् । तृतीये सर्गे अभिराजस्य शैशवं, शिक्षाप्रवेशः, यौवनोगमः, सारस्वतसेवारम्भादिविषयाः चित्रिताः । तत्र यौवनप्रसङ्गो यथा-

यौवनं चास्य काव्यस्य वा यौवनं
साकमेवागतं दर्शनीयं बुधैः ।
शुक्लचन्द्रोपमं वर्धमानं द्वयं
नायिकानां सतां चाहरत् श्रूयते ॥

चतुर्थे सर्गे अभिराजस्य साहित्यसर्जनाद्वारा प्रसिद्धिप्राप्तिर्वर्णिता। पञ्चमे सर्गे अभिराजस्य विदेशवासः ततश्च मृगाङ्कद्वारा भारतभूस्थान् आत्मीयजनान् प्रति सन्देशप्रेषणम् च चित्रितं वर्तते। षष्ठे सर्गे अभिराजस्य जीवने घटिताः केचन रोचकाः प्रसंगाः चित्रिताः, सप्तमे सर्गे अभिराजस्य संस्कृतभारतीं प्रति आस्था, संस्कृते व्याप्तसमस्यां प्रति चिन्तनं चोपस्थापितं वर्तते, अष्टमे अन्तिमे च सर्गे अभिराजस्य देशे प्रतिष्ठादिविषया वर्णिताः सन्ति । महाकाव्यं विरचय्यापि कवेररविन्दस्य तिवारिणो मनो न तुष्यति । स अभिराजचरितमुपस्थापयितुमात्मनोऽसामर्थ्यं प्रकटयति-

राजेन्द्रमिश्रचरितामृतसागरस्थो
नो वेद्मि पारमधुना लघुनाविकोऽहम् ।
तीरेण यामि सहसा न विशामि मध्ये
नौर्जीर्णकाष्ठरचिता सरतीव नाग्रे ॥

साहित्यसंसारे कापि नवा कृतिर्भवतु तस्या मूल्याङ्कनं कालेन जायते, अस्य काव्यस्य गुणवत्तां महिमविषये च नाहं बहु आख्यास्यामि, गुणपक्षधरा अग्रे स्वत एव अनुभविष्यन्ति सर्वम् । अन्ते संस्कृतकविताया: प्रवर्तमानम् अभिराजयुगम् अभिषिञ्च्य भगवन्तं विश्वनाथं कवेरस्य अरविन्दस्य कृते सर्वविधं मङ्गलं च कामयमानो विरमामि ।

# निरन्तरअभ्यासेन संस्कृतभाषायाः उन्नतिः सम्भवति - रंगराजनकुमारः

वार्ताहरः - सचिन शर्मा, मोदीनगरम्, गाजियाबादः,उ.प्र.

उत्तरप्रदेशसंस्कृतसंस्थानलखनऊ द्वारा चालितस्य गृहे गृहे संस्कृतम् योजनायाः अन्तर्गतं द्वादशदिवसीयसंस्कृतशिक्षणशिबिरकेन्द्राणि आभासिमञ्चे एप्रिलमासे समाप्ताः। वरिष्ठप्रशासनिकपदाधिकारी श्री दिनेशमिश्रः अवदत् यत् गृहे-गृहे संस्कृतं योजना उत्तरप्रदेशसंस्कृतसंस्थानस्य विशेषयोजना अस्ति, अनेन माध्यमेन न केवलं मण्डले अपितु ग्रामीणस्तरस्य अपि संचालनं कृत्वा सम्पूर्णे राज्ये संस्कृतस्य प्रचारः क्रियते। सरलसंस्कृतभाषायां प्रशिक्षणं प्राप्य निरन्तरम् अभ्यासः आवश्यकः। यस्मात् कारणात् संस्कृतभाषा व्यावहारिकरूपेण परिष्कृता वर्तते। प्रशासनिकपदाधिकारी डॉ. जगदानन्द झा अवदत् यत् गृहे-गृहे संस्कृतम् योजना संस्कृतभाषायां व्यावहारिकतां प्रदातुं प्रभावी सिद्धा भवति। अतः यत्र भौतिकवर्गाः भवन्ति तत्र समाजस्य सर्वेषां जनानां लाभः भवेत्। अस्मिन् अवसरे जगदीश मेमोरियल पब्लिक स्कूल, कालन्दः, मेरठस्य प्राचार्या संगीतारानी सरस्वतीमातुः पुरतः माल्यार्पणं कृत्वा समापनं कृतवती। समापनसत्रे प्राचार्या तथा च अन्ये सर्वेपि शिक्षकाः छात्राः च उपस्थिताः आसन। तत्र कालंदग्रामप्रमुखः सुधीरवर्मामहोदयस्य विद्यालयप्रबन्धकः यज्ञदत्तशर्मामहोदयस्य ,योगाचार्यः अक्षयकुमारस्य च विशेषसहयोगः आसीत् । केन्द्रप्रबन्धकसंस्थानस्य अध्यापकः श्रीमान् रंगराजनकुमारः आसीत्। अवसरेस्मिन् विद्यालयस्य कर्मचारिणः छात्राः च उपस्थिताः आसन्।



# उपनिषदां सन्दर्भे मनस्तत्त्वम्

-सुशील कुमारी

सर्वप्रथमं विचारयामः किन्नामोपनिषद्, 'उप्-नि' 'उपसर्गद्वयपूर्वकं षद्लृविशरणगत्यवसादनेषु[1] धातोः क्विप्[2] प्रत्ययविहिते सति उपनिषत्पदस्य निष्पत्तिर्जायते। अभिप्रायोऽयं यदध्ययनं सर्वविधाम् अविद्या[3] निवार्य, ईश्वरोपलब्धये जन्मोन्मुखीकृत्य, अशेषाणि कष्टानि, त्रिविधदुःखानि अखिलाश्च वासनाः विधूय निष्कल्मषमानसं मानवं विदधाति तन्नामोपनिषद्।

दुःखत्रयाभिघातज्जिज्ञासा तदपघातके हेतौ[4] इति सांख्यवचनानुसारेण दुःखत्रयकारणं विचारयद्भिः स्थितप्रज्ञैर्मनीषिभिर्यदृष्टमनुभूतं तत्सर्वं लोककल्याणाय सूत्ररूपेण शास्त्रेषु निबद्धम्, तेषूपनिषदामन्यतमं स्थानम्। भवेन्नाम किमपि शास्त्रं परं यदा पर्यन्तं तस्य अध्ययने पठने क्रियमाणे वा प्रत्यक्षलाभो दृष्टिपथं नायाति तावत् पर्यन्तं जनसामान्यस्य प्रवृत्तिस्तत्र न जायते। उपनिषदस्तु वर्तन्तेऽमूल्यानां जीवनमूल्यानामागाराणि ज्ञाननिधयश्च। न केवलमाध्यात्मिकं वर्णनं तत्रोपलभ्यतेऽपितु जनाः जीवने कथं वर्तेरन् तेषां जीवने जायमानाः नैकाः समस्या मानसिका आधयः सर्वेषां समाधानमुपनिषदामध्ययनेनोपदेशेन च भवतुमर्हति। मानवस्य दैनिके जीवने मनसो महती भूमिका। यन्त्रनिर्माणं, शास्त्रचिन्तनं, भवननिर्माणं वा किमपि भवेत, मानवमनस एव महनीया भूमिका, अतोऽस्मनस्तत्त्वं तूपनिषत्सु पौनःपुन्येन परामृष्टम्। तत्र मनसः स्वरूपं कार्याणि च, मनसो भेदाः, मनसो नियन्त्रणम् आदयो विषया विचारिता विद्यन्ते।

मनसः स्वरूपं कार्याणि च उपनिषदामुपदेशः प्रधानतया विद्यते बन्धनानि शिथिलीकृत्य मोक्षसाधनेषु जनानां प्रवृत्तिः। कार्येषु प्रवर्तनं निवर्तनं वा मनस एव व्यापारः। साधूक्तं खलु ब्रह्मबिन्दूपनिषदि मन एव मनुष्याणां कारणं बन्धमोक्षयोः[5]। किमिदं मनस्तत्त्वमिति विचारचर्चायामाचार्यशङ्करस्य मतमुपादेयम्- प्राणान्मन आख्यं संकल्पविकल्पसंशय- निर्णयाद्यात्मकमभिजायते[6] उपनिषज्ज्ञानज्योतिषि प्राप्यते संकल्पविकल्पात्मकं मनः[7]। सांख्यकारिकानुसारं मनः संकल्परूपम् इन्द्रियरूपं चोभयात्मकम्[8]। छान्दोग्योपनिषदस्तु एकः सम्पूर्णः खण्डः मनसः संकल्पविषयमेव कथयति[9]। तथैव यजुर्वेदस्य एके सूक्ते मनसः कार्याणि स्वरूपं च संकथय्य तस्य शिवसंकल्पनात्मकत्वमीप्सितम्।[10] विश्रुतेषु तेषु शिवसंकल्पाख्येषु षण्मन्त्रेषु "तन्मे मनः शिवसंकल्पमस्तु" इति भूयोभूयः प्रार्थितम्। अपि च केनोपनिषदि यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।[11] अनेन मन्त्रेण मनसः कार्यक्षेत्रं शक्तिसीमानं लयोपायांश्च वर्णयता ऋषिणा मनस्सम्बन्धिरहस्यमुररीकृतम्। बृहदारण्यकाभिधेये उपनिषद्ग्रन्थे वर्णितं यन्मनोमयरूपोऽयं पुरुषो भास्वरोऽस्ति।

अत्र आचार्यशङ्करस्य मतमित्थम्- मनोमयो मनः प्रायो मनस्युपलभ्यमानत्वात्। मनसा चोपलभ्यत इति मनोमयोऽयं पुरुषो भाः सत्यो भा एव सत्यं सद्भावः स्वरूपं यस्य सोऽयं भाः सत्यो भास्वर इत्येतत्। मनसः सर्वार्थावभासकत्वाच्चास्य भास्वरत्वम्।[12] इदं मनः सर्वेषामधिपतिः यत्किञ्चिदिदं जगत्तत्सर्वं प्रशस्ति। उपनिषत्स्वपि नैकेषु स्थलेषु मनसः संकल्पस्य स्वरूपं कीदृशं स्यादिति जिज्ञासायाम् उपनिषदृषिणा निर्मलमानसस्यैव माहात्म्यमुद्रीतम्। तद्यथा- यं यं लोकं मनसा संकल्पयति, क्षीणक्लेशः आत्मवन्निर्मलान्तःकरणः कामयते, यांश्च कामान् प्रार्थयते, तं लोकं प्राप्नोति तांश्च कामान्संकल्पितान् भोगान्।[13] वेदान्तसारस्य कोऽध्येता भवितुमर्हतीति जिज्ञासायां विशुद्धान्तःकरणस्य चर्चा करोति सदानन्दयोगी- अधिकारी तु.... निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।[14]

यं यं लोकं मनसा संकल्पयति ... अनेन उपनिषद्वचसा ध्वनितं भवति यज्जनः नैकानि कार्याणि साधयितुं प्रभवति। एकस्मिन्नन्यस्मिन्नपि स्थले उपनिषदि प्राप्यते उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत्।[15] गीतायां भगवता कृष्णेन अर्जुनः सम्यगुद्बोधितः जीवनसंग्रामे उदासीनतां कायरतां भीरुतां च परित्यज्य कर्तव्यपालनाय।[16] अन्यत्रापि ते कथयन्ति- नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।[17] एवं सुविचार्य पूतेन स्वान्तेन कृतं कर्म साधयति साध्यमिह संसारे। महात्मना बुद्धेनापि मनसो महत्ताङ्गीकृता यत् प्रसन्नेन चेतसा कृतानि कार्याणि सुखप्रदानि भवन्ति।[18] अथर्ववेदेऽपि कथितम्- वर्धमाना वयं सूर्यस्योत्तमं ज्योतिः विन्देमहि।[19]

मनस्तत्त्वस्य सर्वशक्तिमत्वमङ्गीकृत्य छान्दोग्योपनिषदि वर्णितं यत् यो जनः ब्रह्म आत्मेति कृत्वा मनस्तत्त्वमुपासते मनसो गतिपर्यन्तं तस्य गतिर्जायते।[20] वेदे शिवसंकल्पात्मके सूक्ते मनसो विशेषणे अजिरं जविष्ठमपि दत्ते।[21] अतिशायने तमबिष्ठनौ[22] अनेन सूत्रेण अतिशायने अर्थे इष्ठन् प्रत्ययो विधीयते। अभिप्रायोऽयं यद् मनो बहुवेगेनेतस्ततो गच्छति। मानवस्योन्नतिरपि मनोवेगवद् भवितुमर्हति एतादृशो विचारोऽयं निराशह्रदयेष्वपि आशाया उत्साहस्य संचारं करोति। येन प्रेरितः कर्मसु संलग्नो जनः स्वकीयं लक्ष्यमाप्नोति, मानवजीवने मन एव साधकत्वेन बाधकत्वेन चोपतिष्ठते निखिलेषु क्रियमाणेषु कर्मसु। उक्तमपि यन्मनसा मनुते तद्वाचा वदति यद्वाचा वदति तत्कर्मणा करोति तदभिसम्पद्यते। मनसो भेदाः- मनोविषये बृहदारण्यकोपनिषदि समुल्लिखितम्- काम-संकल्प-संशय-श्रद्धाऽश्रद्धा-धृति-लज्जादयः सर्वं मन एव[23]। अत्र भाष्ये आचार्यशङ्करवर्या लिखन्ति- मनसोऽन्तःकरणस्य रूपाणि एतानि। ऐतरेयोपनिषदि अपि कथितम्- यदेतद् हृदयं मनश्चैतत्। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिधृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति।[24] केनोपनिषदि समुपलभ्यमानस्य यन्मनसा न मनुते मन्त्रस्यास्यापि भाष्यं कुर्वता शङ्करेण मन इत्यन्तःकरणं बुद्धिमनसोरेकत्वेन गृह्यते इति लिखितम्।[25] गीतायां भगवता कृष्णेन बुद्धेः सात्त्विक-राजसिक-तामसिक-नाम्ना भेदत्रयमङ्गीकृतम्।[26] मनस उत्पत्तिः कथं जातेति ज्ञापयता ऐतरेयोपनिषदि कथितम्- चन्द्रमा मनो भूत्वा हृदयं प्राविशत्।[27] शीतलत्वं पावनत्वं तथा च चराचरस्य जगत्कृते निष्पक्षभावेन प्रकाशप्रदानम् इमे सन्ति चन्द्रस्य गुणाः। वक्तुं शक्नुमः यदस्माकं मनस्सु अपि प्रकृत्या चन्द्रगुणाः समावेशिताः सन्ति। देहिनामपि वर्तते तथाविधं किमपि वैशिष्ट्यं यन्मानवानां मनांसि अपि चन्द्रवच्छीतलानि पावनानि प्रकाशितानि च भवितुं शक्नुवन्ति। वेदेऽपि उपदिष्टं वेदभगवता- स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। पुनर्ददता नता जानता संगमेमहि[28] जैमिनीयोपनिषदि अपि प्राप्यते मनश्चन्द्रमा इति।

अन्तःकरणचतुष्टयविषये निगदति प्रश्नोपनिषद्- पृथिवी च ... मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च।[29]

बुध् अवगमने[30] अस्माद्धातोः क्तिन्प्रत्यये[31] कृते बुद्धिपदस्य निष्पत्तिर्जायते। प्रज्ञानमपि बुद्धेः पर्यायरूपेण मन्वते मनीषिणः। चितिसंज्ञाने इति धातोः क्तप्रत्यये कृते चित्तपदस्य निर्मितिर्जायते। प्रकरणेऽस्मिन् श्वेदों में योगविद्या इत्यभिधेये ग्रन्थे लिखति लेखकः- बुद्धमूलवृत्तीनां संस्कार इति संज्ञा। इमे संस्कारा वृत्तिवन्न विनश्यन्ति तथा जन्मजन्मान्तरेष्वपि चित्तस्य अङ्गत्वेन तिष्ठन्ति। चित्तस्य स्थितिः कूपवद् वर्तते यस्मिन्नैके जन्तवः सन्ति तेषु जन्तुषु कोऽपि कस्मिन्नपि काले उपरि आयाति अधो याति च एवमस्य चेतसः गाम्भीर्यज्ञानं दुष्करं खलु।[32] मतमिदं वेदमन्त्रानुमतमेव।[33]

मनो निग्रहः- अस्य सूक्ष्ममनसो निग्रहविषयं श्वेताश्वतरोपनिषद् वैशद्येन विशदीकरोति- तत्त्वप्राप्तये मनसो बुद्धेश्च संयम आवश्यकः।[34] तत्त्वप्राप्त्यर्थं परमेश्वरस्याराधना समाहितचेतसा करणीया। भवेन्नामैहलौकिकानि पारलौकिकानि कर्तव्यानि कर्माणि सर्वत्र चित्तस्यैकाग्रता नितरामवश्यकी, अत एव गीतायामुद्घोषयति गीताकारः योगः कर्मसु कौशलम्।[35] समाहितचेतसा कार्येषु संसक्तो जनः संसिद्धिं लभते इत्येव कौशलं योगो वा कथ्यते। कर्मसु कौशलं दक्षता वा तदैवागच्छति यदा कर्म दत्तमनसा विधीयते।

वेदेष्वपि विविधासु विभक्तिषु मनः पदस्य भूयोभूयः प्रयोगः द्योतयति यन्मनसः सन्ति नैकानि कार्याणि। इन्द्रियेभ्यः परं मनः[36] इति कठोपनिषदो मतम्। इन्द्रियेभ्यः मनः सूक्ष्मं विद्यते, अत एव अचेतनमपि चेतनवदाचरति। एकस्मिन्नन्यस्मिन् स्थाने छान्दोग्योपनिषदि समुल्लिखितं विद्यते यद् भुक्तस्यान्नस्य यदपि सूक्ष्मतम रूपं तद् मनोरूपेण विपरिणमते।[37] अस्यामेवोपनिषदि प्राप्यते एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति।[38]

यतो हि मनो विषयेभ्यः सूक्ष्मं वर्तते अतो यदि विषयेष्वासक्तिर्न भवेन्मनसः तर्हि इन्द्रियाणि विषयाश्च नालं मनोविकृतये। योगश्चित्तवृत्तिनिरोधः[39] इत्युक्त्वा योगसूत्रकारेण योगस्य परिभाषैव कृता, चित्तवृत्तीनां संयमनं योग इति। अभ्यासवैराग्याभ्यां तासां वृत्तीनां निरोध आवश्यकः। प्रकरणेऽस्मिन् अर्जुनेन पृष्टः प्रश्नः[40] अद्यापि समेषां देहिनां कृते प्रासंगिकः खलु। भगवता कृष्णेनापि स्वीकृतं मनसः चाञ्चल्यं, समदधता च तेन उक्तं गीतायाम्-

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।।[41]

तथा च कठोपनिषदि -

यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथिः ।।[42]

यदा जनेन रशनाभूतं मनो नियन्त्रणे विधीयते तदा इन्द्रियैः विषयेषु गृहत्सु सत्स्वपि रश्मिरूपस्य मनसो निगृहीतत्वादिन्द्रियाणि अपि वशीभवन्ति। मनो वशे यदा तिष्ठति तदा इन्द्रियाणि सदश्वा इव सुखप्रदानि भवन्ति। एवं सति विशुद्धस्वान्तो जनः संसारेऽस्मिन् पुनर्न जायते। परमार्थसाधने यस्य तत्परा बुद्धिर्जायते स जनो मनसि वशे जाते परमं पदमवाप्नोति।[43]

तात्त्विकदृशा विमर्शेन सुतरां स्फुटीभवति यन्मानवस्य मन एवोन्नतेरवनतेर्वा प्रधानतमं कारणम्। अवदातेन पूतेन मनसा कृतानि कार्यजातानि लोककल्याणाय कल्पन्ते। मनो यदा वशे तिष्ठति तदा साधयति असाध्यमपि साधूनां लभते च जनो निर्वापदम् अतः हितेप्सुभिर्मुमुक्षिभिश्च मनो निर्विषयं कार्यम्। सत्यमेवोक्तं कठोपनिषदि-

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्।।[44]

सन्दर्भसूची


१. वैयाकरणसिद्धान्तकौमुदी, भ्वादिगणे, धातुसंख्या ८५४.
२. वार्तिकसूत्रम्, 'सम्पदादिभ्यः क्विप्' (पाणिनीया अष्टाध्यायी ३.३.९४)
३. योगदर्शनम् २.५, अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या।
४. सांख्यकारिका, प्रथमा कारिका।
५. ब्रह्मबिन्दूपनिषद् मन्त्र सं. २, उपनिषज्ज्ञानज्योतिः, प्रकाशकः श्रीगुरुकृपा-आश्रमः, सुन्दरा, आणन्दः, गुजरातप्रान्तस्थः।
६. शाङ्करभाष्यम्, मुण्डकोपनिषद्, १.१.८
७. द्र. प्रकीर्णविषयाणामनुक्रमणिका, पृ. १७, उपनिषज्ज्ञानज्योतिः
८. सांख्यकारिका २७, उभयात्मकमत्र मनः संकल्पमिन्द्रियं च साधर्म्यात्।
९. छान्दोग्योपनिषद्, ७.४.१-३
१०. यजुर्वेदः, ३४.१-६
११. केनोपनिषद्, १.६
१२. बृहदारण्यकोपनिषद्, पञ्चमोऽध्यायः, षष्ठं ब्राह्मणम्
१३. शाङ्करभाष्यम्, मुण्डकोपनिषद्, ३.१.१०
१४. वेदान्तसारः, अनुबन्धचतुष्टये अधिकारिस्वरूपम्
१५. कठोपनिषद्, तृतीया वल्ली, श्लोकसंख्या, १४
१६. गीता २.३, क्लैव्यं मा स्म गमः पार्थ।
१७. तत्रैव ३.८
१८. धम्मपद १-२, मनो पुव्वंगमा धम्मा मनोसेट्ठा मनोमया। मनसा चे सन्नेन भासति वा करोति वा। ततो 'न सुखमन्वेति छाया' व अनपायिनी।
१९. अथर्ववेदः, ७.५३.७, उद्वयं तमस्परि रोहन्तो
२०. छान्दोग्योपनिषद्, ७.३.२
२१. यजुर्वेदः ३४.६
२२. पाणिनीया अष्टाध्यायी, ५.३.५५
२३. बृहदारण्यकोपनिषद्, १.५.३
२४. ऐतरेयोपनिषद्, ३.२
२५. द्र. शाङ्करभाष्यम्, केनोपनिषद्, प्रथमः खण्डः, श्लोकसंख्या ६
२६. गीता १८.३०, ३१, ३२
२७. ऐतरेयोपनिषद् १.२.४
२८. ऋग्वेदः ५.५१.१५
२९. प्रश्नोपनिषद्, चतुर्थे प्रश्ने सं. ८
३०. वैयाकरणसिद्धान्तकौमुदी, भ्वादिगणे धातुसंख्या ८५८
३१. पाणिनीया अष्टाध्यायी, स्त्रियां क्तिन्, ३.३.९४
३२. वेदों में योगविद्या, पृष्ठ सं. १२४, लेखकः- स्वामी दिव्यानन्दसरस्वती, प्रकाशकः- यौगिकशोधसंस्थानम्, योगधाम, आर्यनगरम्, ज्वालापुर हरिद्वारम्, द्वितीयं संस्करणम् १९९९ ई.
३३. यजुर्वेदः, ३४.३, यत्प्रज्ञानमुत चेतो धृतिश्च ।
३४. श्वेताश्वतरोपनिषद्, द्वितीयोऽध्यायः, प्रथमो मन्त्रः
३५. गीता, २.५०
३६. कठोपनिषद्, ६.७, ३.१०
३७. छान्दोग्योपनिषद्, ६.५.१, अन्नमशीतं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः।
३८. तदेव, ६.६.२ तथा च ६.६.५ अन्नमयं हि सोम्यमनः
३९. योगदर्शनम्, १.२
४०. चञ्चलं हि मनः, कृष्ण प्रमाथि बलवद्दृढम् । तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।। (गीता. ६.३४)
४१. तदेव, ६.३५
४२. कठोपनिषद्, १.३.६
४३. तदेव, श्लोक सं. ९
४४. कठोपनिषद्, २.३-१०

## पुस्तकेषु भवेत्प्रीतिः नवयुगेऽपि साम्प्रतम्



प्रो. बनमाली बिश्वालः

पुस्तकस्वरूपम् (प्राचीनम् अर्वाचीनं च)
संज्ञासु हस्तलेखानां पुस्तकमपि गण्यते।
पुस्तिका-पुस्त-पोथासु पुस्तकं समकालिकम्।।
स्थानं वै हस्तलेखानां पुस्तकैः परिवर्तितम्।
पुस्तकानां क्वचित् स्थानं गृहणाति मुखपुस्तकम्।।
सत्सु विभिन्नतन्त्रेषु संगणकाश्रितेषु वै।
स्थानं तत्पुस्तकानां च तद्वदक्षुण्णमेव हि।।
आधुनिके युगेप्यस्मिन् तन्त्रैराधुनिकैस्समैः।
सामान्यस्य जनस्यापि पुस्तकं हृदि राजताम्।।
ई-पुस्तकं भवत्वत्र भवेन्मुद्रितपुस्तकम्।
अध्ययनेनुसन्धाने पुस्तकस्यानिवार्यता।।
पुस्तकपरिभाषोत्र प्रासङ्गिक्यनुभूयते।
स्वरूपं पुस्तकानां च किञ्चिदत्र निवेद्यते।।
भूत-भविष्ययोर्मध्ये सेतुं निर्माति पुस्तकम्।
परम्परासु सम्बन्धं स्थापयति च पुस्तकम्।।
पुस्तकेषु भवेत्प्रीतिः नवयुगेपि साम्प्रतम्।
स्थानं च पुस्तकस्यात्र नेतुमन्यन्न शक्ष्यति।।
पुस्तकदिनमेतच्च पुस्तकेभ्यस्समर्पितम्।
पुस्तकलेखकेभ्यश्च पाठकेभ्यो विशेषतः।।
सामान्यानां जनानां च प्रीतिःस्यात् पुस्तके यथा।
स्मारयितुं तदेवाद्य दिनमेतद् विशिष्यते।।
पुस्तकमस्ति सर्वेषां विदुषां मनोरञ्जकम्।
वदात्र विदुषे कस्मै पुस्तकं नैव रोचते।।
रमते पुस्तके बालः युवा वृद्धस्तथैव च।
वयोभेदो न तत्रास्ति लिंगभेदो न वा पुनः।।
अवस्थासु च सर्वासु पुस्तकं प्रियमात्मनः।
यस्य न पुस्तके प्रीतिः पशुवत्तस्य जीवनम्।।
प्रियाणि पुस्तकान्येव छात्राणां प्रतिभावताम्।
प्रतिभया विना छात्रः सर्वदा पुस्तकाश्रितः।।
पुस्तकेस्ति च या विद्या बुद्धिस्थोपि भवेत् पुनः।
अन्यथा कार्यकाले सा कथं फलवती भवेत्।।
अद्य काव्यार्थचौराणामभिवृद्धिः पदे पदे।
अमृतमिव रक्ष्यं तद् दैत्याद् यथोब्धिमन्थने।।
सर्वस्वत्वाधिकारश्च सर्वादौ लेखके भवेत्।
प्रतिलिप्यधिकारश्च प्राप्तव्यो लेखकात् सदा।।
लिख्यन्ते पुस्तकान्यद्य यथा काले पुरातने।
वाचकानां समस्योद्य गुणीभूता न संशयः।।
क्रेतारः पुस्तकानां तु विरलाश्च न संशयः।
अद्य ग्रन्थालयेष्वेवं न दृश्यन्तेपि वाचकाः।।
आह्वानञ्च युगस्यास्य पठने रुचिवर्धनम्।
पुस्तकानां व्यथा येन लघूकर्तुं हि शक्यते।।
ज्ञानस्य रक्षणार्थं च ग्रन्थो वै श्रेष्ठमाध्यमः।
पुस्तकाल्लभ्यते ज्ञानं पुस्तकेनैव धार्यते।।
जयतात् पुस्तकं लोके जयतात्तस्य लेखकः।
जयेयुः पाठकास्सर्वे यदर्थं पुस्तकानि वै।।

## विद्या वाग्देवता लोके विद्यालयोऽपि मन्दिरम्

प्रायशो गम्यते यत्र क्रियते देवदर्शनम्।
विद्या वाग्देवता लोके विद्यालयोपि मन्दिरम्।।
विद्याया मन्दिरं श्रेष्ठं सर्वेषु मन्दिरेषु वै।
हैद्राबादे मया कृतं विद्यामन्दिर-दर्शनम्।।
उस्मानियेति नाम्नोस्ति विश्वविद्यालयस्तु यः।
तत्राम्बेडकराख्यश्च ग्रन्थालयः प्रसिद्ध्यति।।
छात्रैश्च परिपूर्णोस्ति तत्रत्यो वाचनालयः।
संस्कृत-पुस्तकानां च कृतं मयोवलोकनम्।।
कलाशाखा च तत्रत्या प्राचीने भवने स्थिता।
सामाजिकं च विज्ञानं तद्भवने च पाठ्यते।।
भवनं प्रस्तरैश्चैव निर्मितमस्ति सर्वथा।
विश्वविद्यालये चातो दर्शनीयं हि मन्यते।।
संस्कृतपरिषत्तत्र प्रसिद्ध्यति पुरातनी।
प्रकाशनेन शोधस्य महत्त्वं यत्र वर्तते।।
मल्लीनाथस्य जन्मात्र जातमित्येव मन्यते।
ग्रामे कोलाचले ख्याते हैद्राबाद-समीपके।।
प्रसिद्धानां च काव्यानां टीकाः कृताश्च मानकाः।
लिख्यते यत्र नामूलं कथ्यतेपेक्षितं सदा।।

## (२) कनुप्रिया

हिंदीमूलम् ; धर्मवीरः भारती
अनुवादकः ; कौशलः तिवारी



-कौशल तिवारी

**चतुर्थ गीतम्**

यदहं मध्याह्नकालस्य नीरवतायां
यमुनाया निर्जनघट्टे
स्वकीयानि सम्पूर्णवस्त्राणि
तटे निधाय
होरायावज्जले निरूपयामि
त्वं किमवगच्छसि यदहम्
इत्थमात्मानं पश्यामि ?
न मम श्याम !
यमुनाया नीलनीरे
मम वेतसलतासदृश :
कम्पमानो देहबिम्बस्-
तञ्च परितः
श्यामलागाधताया गम्भीरप्रसारः,
जानासि कीदृशः प्रतीयते-
मन्ये यमुनायाः श्यामलगाम्भीर्यं नास्ति,
अयं त्वमसि,
यः सम्पूर्णावरणानि दूरीकृत्य
कणे - कणे, रोमणि-रोमणि
स्वश्यामलप्रगाढागाधालिङ्गनेन
पर्वणि-पर्वणि
मां समन्ततो द्रढयसि ।
त्वं किमवगच्छसि यदहं
होरायावज्जले
आत्मानं निरूपयामि
न, न मम श्याम!

**पञ्चमं गीतम्**

यदहं गृहकार्यालसा भूत्वा
प्रायोऽत्राऽऽगच्छामि
कदम्बछायायाञ्च
शिथिलेव,
अस्तव्यस्तेव,
खिन्नेव निपतिताऽस्मि
पश्चात्तापो ऽयं प्रत्येकं क्षणे
तुदति मां यत्
तस्यां रासरात्रौ
तव निकष्टादहं कथं प्रत्यावृत्ता?
यौ चरणौ
तव वेणुवादनस्य लये
तव नीलपद्मतनोः प्रदक्षिणां कृत्वा
नृत्यतः स्म
तौ पुनः गृहं प्रति
कथमुत्थितौ?
तद्दिवसे कथमहं प्रत्यावृत्ता?
कणं कणमात्मानं दत्त्वा तुभ्यं
रिक्ता कथं न जाता?
त्वया तु तस्यां रात्रौ
अंशतो ऽपि य आत्मसात्कृतः
स सम्पूर्णं कृतः
स्वगृहं च प्रेषितः
किन्तु हन्त सा सम्पूर्णता तु
देहस्यास्य प्रत्येकं कणे
पुनः पुनस्तुदति
त्वत्कृते
कीदृशो ऽसि त्वम्?
यदाऽहं गन्तुम्मेव नेच्छामि
तदा वेणोः गभीरालापेन
मदोन्मत्तां मामाकृष्याऽऽह्वयसि
यदा च पुनरागन्तुं नेच्छाम्यहं
तदा मामंशतो गृहीत्वा
सम्पूर्णा च कृत्वा
प्रत्यर्पयति ।।

## हनुमदष्टकम्

-मार्कण्डेयो रवीन्द्रः

दशाननस्य काञ्चनेन निर्मितं पुरं हि यत्
ददाह लीलया सुसेवको रघूत्तमस्य तत्।
विदेहनन्दिनीकृपाष्टसिद्धिदायकं प्रभुं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(1)

रघूत्तमः स राघवो हृदि स्थितो हि मारुतेः
ददर्श मानसं विदार्य कोशलेशराघवम्।
भयङ्करो निशाचराय जानकीकृते लघुः
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(2)

करे च सौषधं गिरिं दधाति वायुनन्दनः
गदायुधः प्रयाति वानरोऽन्तरिक्षमण्डले।
नमन्ति नारदश्च शारदा वसुन्धराधरो
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(3)

गुणाकरं महाकपिं भटं दिनेशभक्षकं
पिशाचभूतघातकं विपद्गतस्य रक्षकम्।
कचौश्च कुञ्चितैः सुशोभितं खमार्गगामिनं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(4)

विभीषणस्य वानराधिपस्य चोपकारकं
निशाचरेशरावणस्य वाटिकाविनाशकम्।
महीधरस्य धारकञ्च लक्ष्मणस्य रक्षकं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(5)

यदा रसातलस्य रावणः प्रगृह्य सानुजं
प्रभुं कुलेश्वरीसमर्चनाय याति मन्दिरम्।
हतो वनौकसा तदा ससैन्यदानवश्च तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(6)

हता च येन लङ्किनी तथाक्षयो रिपोः सुतः
प्रजापतेश्च गौरवे विधातृपाशबन्धनम्।
निकेतने दशाननस्य निर्भयो स्थितो हि तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(7)

बलं न दुर्बलो जनो मनीषया हि वञ्चितो
धनं न निर्धनस्ततो न बान्धवा न सुहृदः।
स एव रक्षकः स एव पालकस्ततो हि तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(8)

छन्दः-पञ्चचामरम्

## कुरुते पुरुषं बहुलं मधुरम्



डॉ. जोगेन्द्रकुमारः
एसोसिएट प्रोफेसर
बी.एल.जे.एस.
महाविद्यालयः
तोशामः(भिवानी)

वसनं रुचिरं वचनं मधुरं
त्वरितं शयनं खलु जागरणम्।
अशनं सरलं मननं सरलं
कुरुते पुरुषं बहुलं मधुरम्।।

वचनं सुदृढं वरणं मधुरं
भजनं गिरिशं पठनं ह्यनिशम्।
भ्रमणं सततं गमनं सरलं
कुरुते पुरुषं बहुलं मधुरम्।।

प्रकृतिर्मधुरा च कृतिर्मधुरा
विशदा हि मतिश्च रतिर्विशदा।
समता हि सुखे व्यसने समता
कुरुते पुरुषं बहुलं मधुरम्।।

त्यजनं ह्यहितं ग्रहणञ्च हितं
हसितं मधुरं नयनं मधुरम्।
चरितं विमलं हृदयं विमलं
कुरुते पुरुषं बहुलं मधुरम्।।

वपनञ्च तरोरवनं पयसः
व्यथनं न जनं दमनं मनसः।
शपनं विमलं भरणं विमलं
कुरुते पुरुषं बहुलं मधुरम्।।

# प्रामाण्यवादः- दार्शनिकं विवेचनम्

-डॉ० रामसुमेरयादवः

संस्कृतवाङ्मयं सर्वासु भाषासु कृतभूरिपरिश्रमैः विपश्चिद्भिः स्वपाण्डित्यप्रकर्षैः सुदीर्घपरम्परां पुष्णाति । स्वीयया नवनवोन्मेषशालिन्या प्रतिभया तैः महर्षिभिः दर्शनस्य दर्शनं विहितम्। सविशेषसेमुषीजुष्भिः मीमांसान्यायपरायणैः गवेषकैः नूतनान्नूतनतत्त्वमधिगम्यते स्म। ततः हि प्रामाण्यवादः दार्शनिकानां कृते प्रमुखो हि शोधविषयः मीमासकानां कृते तु प्रथमो सिद्धान्तः। ते स्वतः प्रामाण्यवादमेवाङ्गीकुर्वन्ति। स्वतः प्रमाणमवलम्ब्य यथा मीमांसकाः प्रतिपादयन्ति तथा नैयायिकाः न स्वीकुर्वन्ति। न्यायदर्शनेऽपि चर्चा चर्चिता। अन्यैरपि दार्शनिकैः विचाराः प्रस्तुताः। प्रामाण्यस्यार्थः ज्ञानस्य यथार्थता भवति। प्रमाणशब्दात् भावे ष्यञ्प्रत्यये विहिते प्रामाण्यं संगच्छति। प्रामाण्यस्य त्रयो हि अर्थाः यथार्थता अयथार्थज्ञानस्य साधनं प्रमातेति। तथापि प्रामाण्यप्रसिद्धेः यथार्थज्ञानमेव स्वीकरणीयम्। तदा ष्यञ्प्रत्ययानन्तरं प्रामाण्यस्यार्थः ज्ञानस्य यथार्थता भवति। ज्ञानस्य याथार्थ्यलक्षणं प्रामाण्यम्।

प्रामाण्यवादस्यारम्भः सर्वप्रथमं भारतीयेषु दर्शनेषु जैमिनिमुनेः मीमांसासूत्रेण जायते । यत्र सः वेदवैदिकज्ञानयोः स्वतः प्रामाण्यं स्थापयन् यत्नशीलः दृश्यते। आरम्भे तु प्रामाण्यमिदं वेदं, वैदिकज्ञानं यावदेवासीत् परन्तु शनैः शनैः व्यापकरूपेण लौकिकज्ञानक्षेत्रेऽपि प्रामाणस्योदयः सञ्जातः। प्रामाण्यवादस्य प्रसङ्गे विचारः करणीयः। प्रथमतः ज्ञाने प्रामाण्यं कथम् उत्पद्यते ? प्रमाता ज्ञाने स्थितः प्रामाण्यस्य ग्रहणं भवति। द्वयो प्रश्नयोः समाधानं कुर्वद्भिः शास्त्रकारैः द्वयोः शब्दयो प्रयोगः कृतः स्वतः परतश्च। स्वतः प्रामाण्यस्य तात्पर्य यत् येभ्यः कारणेभ्यः ज्ञानमुत्पद्यते तेभ्यः कारणेभ्यः ज्ञाने प्रामाणस्योत्पत्तिः भवति केशवमिश्रो व्याहरति । ज्ञानग्राहकातिरिक्तानपेक्षत्वं स्वतस्त्वं प्रामाण्यस्य। एतद्विपरीतं परतः प्रामाणस्योत्पत्तिः पक्षे अर्थः स्यात्। यत् येभ्यः साधनेभ्य ज्ञानमुत्पद्यते तेभ्यः विभिन्नसाधनेभ्यः ज्ञाने प्रामाण्यस्योत्पत्तिः भवति। सांख्यदर्शनावलम्बिनः पूर्णतः स्वतः प्रमाण्यवादिनः सन्ति। अर्थात् सांख्यदर्शनं पूर्णतः स्वतः प्रामाण्यवादि वर्तते। अर्थात् ज्ञाने प्रामाण्यम् अथवा अप्रामाण्यस्योत्पत्तिः स्वतः एव भवति 'प्रमाणत्वाप्रमाणत्वे स्वतः संख्या समाश्रिताः' परन्तु न्यायवैशेषिकाणां मते प्रामाण्याप्रामाण्यस्योत्त्पत्तिः ग्रहणञ्च द्वेऽपि परतः भवतः। पूर्वमीमांसकवेदान्तिनाञ्च मते सर्वज्ञानं स्वतः प्रमाणं भवति परन्तु तत्र अप्रामाण्यस्योत्पत्तिः तथा च ज्ञप्तिः परतः अर्थात् बाह्यकारणात् भवति ।

बौद्धमते तु ज्ञानं स्वतः अप्रमाणं भवति। तस्मिन् हि प्रमाणस्य निर्धारणं परतः क्रियते। भारतीयदर्शनेषु विभिन्नेषु सम्प्रदायेषु ज्ञानप्रामाण्यविषये विभिन्नानि मतानि प्राप्यन्ते ।

न्यायसाहित्ये प्रामाण्यस्य चर्चा विदधत् मीमांसकः उल्लिखति । मीमासायाः तिस्रः परम्परा वर्तन्ते। कुमारिलभट्ट-प्रभाकर-मुरारिमिश्रां त्रयोऽपि जनग्राहकसामग्रीं प्रामाण्यं स्वीकुर्वन्ति। भट्टमते ज्ञाततान्यथानुपपत्तिः मूलकार्थापत्तिः, गुरुमतेन स्वयं ज्ञानं, मिश्रमतेन अनुव्यवसायः। प्रभाकरैः ज्ञानं स्वप्रकाशं स्वीकृतम्। एतैः प्रत्येकं ज्ञाताभ्यां पदार्थाभ्यां सह निजस्वरूपं प्रकाशयति अहं (ज्ञाता) इदं (ज्ञेयम्) जानामि (ज्ञानम्) अस्मादैव त्रिपुटीप्रत्यक्षनाम्ना कथ्यते। ज्ञानस्य मौलिकं निश्चयात्मकरूपे व्यवसायमस्ति । यथा इदं पुस्तकं एवम्भूतस्य व्यवसायस्य ज्ञानम् आत्मनि एव नयनाभ्यामवलोकिते सति भवति परन्तु आत्मनि ज्ञानस्योत्पत्तिः तथा च तस्य साक्षात्कारः एक एव भवति। प्रामाण्यवादः चिरकालादेव शास्त्रार्थस्य विषयः वर्तते। मण्डनमिश्रमहाभागः नैयायिकः आसीत। यदा शङ्कराचार्यः यतिः शास्त्रार्थभावनया मण्डनमिश्र निकषा गन्तुकामः आसीत् तदा मार्गं पृच्छन् एकस्याः दास्याः समक्षं प्रश्नमकरोत्-

**स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति।**
**शिष्योपशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम।**

अस्मिन् गृहे शुकपक्षिणोऽपि स्वतः प्रमाणं परतः प्रमाणमिति जल्पन्तः दृश्यन्ते सा दासी कथयति- श्तदेव मण्डनमिश्रस्य गृहं वर्तते यत्र हि शुकानां मुखेभ्योऽपि स्वतः परतः प्रमाणविचाराः निःसरन्ति।

**श्लोकवार्तिके स्वतः सर्वमापमाणानां प्रामाण्यमिति गम्यताम्।**
**नहि स्वतोऽसती शक्तिः कर्तुमनेन शक्यते ।।**

जैनाचार्यो हेमचन्द्रसूरिरपि लिखति तत्प्रामाण्यं स्वतः परतश्चेति । तदुभयमुत्पत्तौ परतः एवं ज्ञप्तौ तु स्वतः इति। विषयेऽस्मिन् षट् पक्षाः दर्शनीयाः सन्ति।

१. प्रामाण्याप्रामाण्यञ्च परतः इति न्यायवैशेषिकाः ।

२. प्रामाण्यमप्रामाण्यमञ्च स्वतः इति सांख्याः ।

३. प्रामाण्यं स्वतः अप्रामाण्यं परतः इति मीमांसकाः ।

४. अप्रामाण्यं स्वतः प्रामाण्यं परतः इति।

५. अभ्यासदशापन्नज्ञाने उभयमपि स्वतः अनभ्यासदशापन्नज्ञाने उभयमपि परतः इति शान्तरक्षितः ।

६. उत्पत्तौ उभयादपि परतः ज्ञप्तौ उभयमपि स्वतः इति जैनपक्षः।

अत एवोक्तम्-

**प्रमाणत्वाप्रमाणत्वं सांख्ये योगे स्वतो मतम्।**
**प्राभाकराश्च भाट्टाश्च प्रामाण्यं ब्रुवते स्वतम्।।**
**अप्रामाण्यं पुनस्तेषां दोषान् परतो मतम्।**
**उभयं परतो ज्ञेयं प्रोक्तञ्च गौतमे नये ।।**
**स्वतोऽभ्यासदशापन्ने उभयं शान्तरक्षितैः ।**
**अनभ्यासदशायां तैरुभयं परतो मतम्।**
**स्वतस्त्वं तु समुत्पत्तौ ज्ञप्तौ परतस्त्वं तथा।**

प्रामाण्यवादो मीमांसकानां प्रमुखः सिद्धान्तोऽस्ति । तेषां मते स्वतः प्रमाणमेव प्रामाण्यकोटिमारोहति न परतः प्रमाणं तेषां मते युक्तिसंगतम्। अत एव परतः प्रामाण्यवादिभिः सह तेषां प्रबलः संघर्षोऽजायत ।

कुमारिलभट्टमते घटज्ञाने सति ज्ञानमुत्पद्यते। तस्मात् प्रत्यक्षविषयी ज्ञानताधर्मः उपैति । तत्तज्ज्ञानस्य न स्वयं प्रत्यक्षत्वमपितु ज्ञानधर्मविशेषस्य ज्ञानतालक्षणस्यैव प्रत्यक्षत्वम् एतत् ज्ञानताधर्मद्वारीकृत्यैव ज्ञानस्य तत्प्रामाण्यस्य उदयः सम्भवति। मुरारिमिश्रस्य मतस्य न्यायाभिमतेन सार्धं न कश्चिद विशिष्टो विसंवादः वर्तते। तन्मते ज्ञानस्यैव प्रत्यक्षत्वम् 'मुरारेः पन्थास्तृतीयः' प्रसिद्धो भवति।

उपरि निगदितानामाचार्याणां कथनस्य क्रमशः परीक्षया मथुरातर्कवागीशेन स्वकीये चिन्तामणिरहस्याख्ये ग्रन्थे प्रकाशितं यत् एषु सर्वेषु मतेषु प्रभाकरस्य मतं वास्तविकरूपेण सुदृढं प्रतिभाति। अतः तदेव प्रामाण्यवादत्वेनोन्नेयम्। तत्र कथितं वर्तते स्वतः स्वाश्रयजनकसामग्रीतः स्वप्रमाण्यम् एतत्तु गुरुमतं वर्तते परतः तदन्यसामग्रीतः एतत् तु मिश्रमतन्यायमते इति। मीमांसकास्तु स्वतः प्रामाण्यवादिनः वर्तन्ते। स्वतः प्रामाण्यस्य मतम् इति तेषां मतम् । ज्ञानग्राहकातिरिक्ता नापेक्षन्त्वं स्वतस्त्वम्। तात्पर्यमिदं ज्ञानग्राहकसामग्रीतः भिन्ना सामग्री प्रामाण्ये ग्रहाय यत्र न अपेक्षिता स्यात् तदेव स्वतः प्रमाणम्। तद्विपरीतं ज्ञानग्राहकातिरिक्तापेक्षत्वं परतस्त्वम्, अर्थात् यत्र ज्ञानग्राहकसामग्री प्रमाणग्राहकसामग्री च भिन्ना स्यात् तदा परतः प्रामाण्यमङ्गीक्रियते। मीमांसकानां मते ज्ञानस्य प्रामाण्यस्य च ग्राहिका सामग्री एका एव भवति। तथा ज्ञाततान्यथानुपपत्तिप्रसूता अर्थापत्तिः परन्तु न्यायमते ज्ञानग्राहकसामग्री अनुव्यवसायः वर्तते। एवं प्रामाण्यग्राहकसामग्री अनुव्यवसायाद्भिन्नं प्रवृत्तिसाफल्यमूलकमनुमानं वर्तते।

मीमांसकानां मते अयं घटः इति ज्ञानात् घटे ज्ञाततानामको धर्मः जायते। अयं हि ज्ञानताधर्मः घटज्ञानात् पूर्वः नासीत्। इदं तु ज्ञाने उत्पन्ने सति अयं धर्मः समुत्पद्यते। अतः घटः इति ज्ञानजन्यः अयं ज्ञानताधर्मः अस्मात् ज्ञातताधर्मस्य कारणं ज्ञानमेव भवति। नैयायिकानां मते ज्ञानताधर्मः नास्ति। अतः ज्ञातत‍ासिद्धौ मीमांसकानां कृते नूतनः विचारः आपतति । ज्ञाततासिद्धिं विना स्वतः प्रामाण्यस्य सिद्धिः न सम्भवति अतः अस्मादेव मीमांसकाः विषयत्वान्यानुपपत्तिप्रसूत्या अर्थापत्त्या ज्ञाततां संसाधयन्ति अतः अयं घटः इति घटाद्धि जायते। घटज्ञानस्य विषयः घटो भवति न इति नैयायिकाः स्वीकुर्वन्ति। ज्ञानस्याकारेण बाह्यार्थानुमानं बौद्धैः क्रियते सौत्रान्तिकमते बाह्यार्थामस्तित्वं स्वीकृत्य ज्ञानं तज्जन्यं तदाकाररूपेण भवति। घटज्ञादुत्पन्ना ज्ञातता केवलं घटे एव भवति पटे तु न भवति। अतः घटज्ञानस्य विषयः घट एव भवति न तु पटः। नैयायिकानां मते ज्ञानविषयातिरिक्ता ज्ञातता नैव स्वीकार्या भवति। ज्ञातता एव मीमासकानां स्वतः प्रामाण्यं मूलं वर्तते। मीमासंकाः ज्ञातितामाश्रित्यैव ज्ञाततान्यथानुपपत्तिप्रसूतया अर्थापत्त्या ज्ञानस्य तत्प्रामाण्यस्य च ग्रहणं स्वीकुर्वन्ति । परन्तु षछिन्ने मूले नैव पत्रं न शाखाष इति निगद्य ज्ञानताखण्डनं विधाय नैयायिकाः स्वतः प्रामाण्यवादं खण्डयन्ति। एवं च यथा यथार्थज्ञानात् ज्ञातता उत्पद्यते तथैव अयथार्थज्ञानादपि। अतः यदि प्रामाण्यं स्वतः भवति। तदा अप्रामाण्यमपि स्वतः स्वीकर्तव्यमिति अथवा परतः स्वीकर्तव्यं मीमासकैः। परन्तु मीमांसकास्तथा न कुर्वन्ति। ते प्रामाण्यं स्वतः एवं प्रामाण्यं करणदोषत्वात् परतोऽङ्गीकुर्वन्ति ।

न्यायमते प्रामाण्यस्य अप्रामाण्यस्य च स्वीकरणं प्रवृत्तिसाफल्यमूलकानुमानेन भवति। परन्तु ज्ञानस्य अनुव्यवसायेन भवति। षअहं घटं जानामिष इति ज्ञानं यदा जायते तदा अयं घटः इति ज्ञानं घटाज्जायते। अतः ज्ञानस्य विषयो घटः वर्तते। मीमांसकस्य ज्ञाततायाः समुत्पत्तिः अयं घट इति ज्ञानात् भवति। नैयायिकानामनुव्यवसायस्य उत्पत्तिरपि घटमिति ज्ञानात् भवति। तत्र भेदोऽस्ति मीमांसकस्य ज्ञातता अयं घटगतो धर्मः वर्तते। नैयायिकानां तु अनुव्यवसायः घटे न तिष्ठति। अपितु आत्मधर्मः वर्तते। यतोहि आत्मनः धर्मः ज्ञानं भवति।

नव्यन्यायग्रन्थेषु मथुरानाथ-जानकीनाथ-रघुदेवभट्टाचार्य-गदाधर भट्टाचार्यादीनां विचाराः विस्तरेण दृश्यन्ते। यथार्थः तु दार्शनिकानां मतेषु प्रामाण्यवादः अत्यन्तमेव प्रौढा शास्त्रीयचर्चा। मन्मतिः क्षुद्रेतरा तदापि किञ्चिदात्मतोषावाप्तये विचारितम्।

ज्ञानजनितज्ञातताधारत्वमेव हि घटादज्ञानविषयत्वम्। तथा हि तादात्म्येन विषयता विषयविषयिणोः घटज्ञानयोः घटे किञ्चित् जनितं येन घट एव तस्य ज्ञानस्य विषयः नान्यः।

ज्ञातता तथापि तन्मात्रेण ज्ञानं गम्यते। ज्ञातता विशेषेण प्रमाणज्ञानव्यभिचारिणा प्रामाण्यमिति कुत एव ज्ञानग्राहकग्राहयता प्रमाणस्यानन्तरं केनचित् ज्ञातताविशेषेण प्रमाणज्ञानाव्यभिचारिणो ज्ञानप्रामाण्येन सदैव गृह्येते। केनचित् ज्ञातताविशेषेण अप्रमाणज्ञानाव्यभिचारिणा ज्ञानाप्रामाण्येन सदैव गृह्येते इति अप्रामाण्यमपि स्वतः एव गृह्यताम्।

अथ चाप्रामाण्यं परतस्तर्हि प्रामाण्यमपि परतः एव गृह्यताम्। ज्ञानं हि मानसप्रत्यक्षेणैव गृह्यते प्रामाण्यं पुनरनुमानेन तथाहि जलज्ञानानन्तरं जलार्थिनः प्रवृत्तिः द्विधा फलवती अफलवती च। तत्र हि या फलवती प्रवृत्तिः सा तु समर्था। तथा प्रवृत्त्या तज्ज्ञानस्य याथार्थ्यलक्षणं प्रामाण्यमनुमीयते।

समासतः कथयितुं शक्यते भारतीयदर्शनेषु नैयायिकाः परतः प्रामाण्यवादिनः सन्ति परन्तु मीमांसकाः स्वतः प्रामाण्यवादिनः सन्ति। सांख्यदर्शनावलम्बिनः प्रामाण्यम् अप्रमाण्यं च द्वेऽपि स्वतः स्वीकुर्वन्ति।

श्जैनदर्शनञ्च स्वतः परतः प्रामाण्यार्थद्वयमपि स्वीकुरुते जैनदर्शनं तु भिन्नभिन्नदृष्ट्या समर्थयते। अस्यामवस्थायां जातो हि निश्चयः स्वतः प्रामाण्यवादस्य साक्षी तथा अन्येषामाधारेण सञ्जातः। प्रामाण्यं निश्चयं परतः प्रामाण्यस्य पोषकं भवति अतः प्रामाण्यस्य धर्मः अस्मात् कारणात् अस्योत्पत्तिरपि तैः कारणैः सम्भवति यैः कारणैः प्रमाणस्य उत्पत्तिर्भवति। परन्तु ज्ञप्तिः निश्चयो वा स्वतः परतः द्वाभ्यामेव प्रमाणनयतत्त्वलोकदोषरहितकारणसामग्रीतः ज्ञानं भवति। तत् यथार्थज्ञानं कथ्यते। यथा पर्याप्तप्रकाशे दोशरहितनेत्राभ्यां कस्यचिद् वस्तुनः प्रत्यक्षं ज्ञानं भवति ।

अस्माभिः तत् यथार्थज्ञानं कथ्यते। एवमेव यदा केनचित् आप्तेन निगदिते शाब्दज्ञानं भवति। तदपि यथार्थमेवावगम्यते। अतः मीमांसकैः कथितज्ञानस्य प्रामाणकिता प्रामाण्यं यथार्थता वा तज्ज्ञानस्योत्पादकसामग्रीतत्त्वे विद्यमाना भवति। अर्थात् ज्ञानेन सह तस्य प्रामाण्यं कथ्यते। ज्ञानं प्रामाण्ययोः पौर्वापर्यं भवति मीमांसकानाम् अयमेव स्वतः प्रामाण्यम्।

ज्ञानस्य यथार्थत्वं तस्य स्वभावः तस्य ज्ञानस्य यथार्थतां ज्ञातुम् अन्यप्रमाणस्यावश्यकता नैव भवति। परन्तु तस्योत्पादककारणेषु चेत् कोऽपि दोषः समायाति तदा पूर्वज्ञानं त्याज्यं भवति। तदा ज्ञानम् अयथार्थम् अप्रमाणं वा कथ्यते। अर्थात् ज्ञानस्योत्पादककारणानां दोषपूर्णे जाते ज्ञानास्यायथार्थता भवति।

नैयायिकानां मते परतः भवति। तेषां हि मते ज्ञाने सति तदयथार्थता अनुमानस्यावश्यकता भवति। ज्ञाने सत्येव तदनुसारं जाता प्रवृत्तिः चेत् सफला भवति। तदाः अस्माभिः तर्केण पूर्वज्ञानं यथार्थमवगम्यते। अतः प्रमाणं परतः भवति। तत्र स्वतः इत्यत्र नास्ति अवकाशः । नैयायिकानां मते परतः प्रामाण्ये स्वीकृते अनुमानस्य साहाय्येन यथार्थमवगम्यते। तदनुमानस्य यथार्थतायै तृतीयानुमानस्यावश्यकता सम्भविष्यति। तदा तृतीयानुमानस्यायथार्थतामवगन्तुं चतुर्थस्यानुमानस्य आवश्यकता भविष्यति। अतः निरन्तरम् अनुमानस्यैवावश्यकता स्थास्यति एव अवकाशस्य दोषो तत्रायाति। अतः नैयायिकानां परतः प्रामाण्यपक्षस्य स्वीकरणं नोचितम्। मीमांसायामेव परतः प्रामाण्यपक्षमेवाङ्गीकार्यं विद्यते।

**सन्दर्भ सूची**

१. वेदान्तपरिभाषा।
२. सांख्यकारिका।
३. वेदान्तसारः।
४. तर्कभाषा।
५. सर्वदर्शनसंग्रहः।
६. शोधप्रभा।
७. परिशीलनम्।

**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# बालभारतीपब्लिकविद्यालये 'संस्प्रन्योर' इति संस्कृतप्रतियोगिता भव्यतया आयोजिता

**मुख्यांशा:**

**दिल्ल्याः अनेक-विद्यालयानां प्रायः सप्तति-मितैः छात्रैः कृता प्रतिभागिता।**
**भारत प्रशासनस्य 'स्टार्ट-अप' उपक्रमेण अभिप्रेरिता आसीत् प्रतिस्पर्धा।**
**संस्कृतेन समृद्धिः, संस्कृतेन संस्कृतिः संस्कृतेन सभ्यता इति भावः चरितार्थीकृतः छात्रैः।**
**आकर्षकाणाम् औद्योगिक-नवोन्मेष-कलापानां जातम् प्रस्तवनम्।**
**संस्कृते आजीविकाम् अवलम्ब्य छात्रैः कठोर-परिश्रमेण प्रदर्शिता भव्यप्रतिभा।**

-डॉ. युवराजः भट्टराई

नवीना दिल्ली, 01.05.2024 तमे दिनांके बुधवासरे सर गंगारामचिकित्सालय-मार्गस्थिते



प्रशासनेतरे बाल भारती पब्लिक विद्यालये संस्कृत-विभाग-पक्षतः 'संस्प्रन्योर' इत्याख्या अभिनवा उद्योगोन्मेष-कल्पना-परा प्रतिस्पर्धा समनुष्ठिता, यस्यां स्पर्धायां दिल्ल्याः नैकेषां विद्यालयानां छात्र-छात्राभिः नैजीः प्रतिभाः प्रदर्शिताः। ध्यानास्पदमस्ति यत् एषा प्रतियोगिता भारत-प्रशासनेन प्रकल्पितेषु नवोन्मेष-परेषु उपक्रमेषु यथा - स्थानीयतायै मुखरता, स्टार्ट अप प्रकल्पः, विकसितं भारतम्, चेत्यादिषु राष्ट्र-रक्षण-विकसन-संवर्धन-परक-विषयेषु जागरूकता-संवर्धनार्थम् आयोजिता आसीत् । छात्रैः अपि एतन्निभेषु अद्भुत-शीर्षकेषु आकर्षकाभिनय-पूर्वकं नाट्य-प्रस्तुतिः प्रदत्ता।

प्रतिभागिभिः छात्रैः प्रतिस्पर्धायां नव-नवोन्मेष-शालि-नाट्याभिनय-पुरस्सरं सम्भाषणं कृत्वा संस्कृत-भाषायां नैपुण्यतया समुपस्थिताः जनाः चमत्कृताः।

एतस्मिन् प्रतिस्पर्धा-समारोहे मुख्यातिथि-रूपेण संसद् टी. वी. इत्यस्य दूरदर्शनस्य वरिष्ठः पत्रकारः संस्कृत-मनीषी च डॉ. प्रसून-कुमार-मिश्रः उपस्थितः अभूत्। युगपदेव अमुना एव जनेन मुख्य-निर्णायकस्य भूमिका अपि निर्व्यूढा। तत्रैव द्वितीय-निर्णायक-रूपेण प्रख्याता संस्कृत-विदुषी अध्यापिका च श्रीमती पूनम-शर्मा-वर्या उपस्थिता आसीत्। प्रतियोगितायाः पश्चात् छात्रान् जनांश्च सम्बोधयन् डॉ. प्रसून-मिश्रः प्रावोचत् यत् बाल-भारती विद्यालयः भारतस्य प्राचीन-संस्कृत-विद्या-परम्पराः अद्यत्वे आधुनिके वैज्ञानिके युगेऽपि नव्य-पीठिकायाः नव-युवकेषु किशोरेषु च संक्रान्तं कर्तुम् अत्यन्तमेव श्रमसाध्यम् अन्यैः विद्यालयैः अनुकरणीयं च कार्यं कुरुते। प्रतिस्पर्धायां छात्राणां अत्यधिक संख्यायां प्रतिभागितां संस्कृतं प्रति तेषाम् उत्साहं चावलोक्य अमुना प्रोदितं यत् वस्तुतः एते लघु-लघवः बालाः किशोराः छात्राः च संस्कृतस्य भाष्यमाणस्य रूपस्य पुनरुज्जीवनस्य नवीनाः आशाः सन्ति। बाल भारती विद्यालयस्य स्थापना एव भारत्याः अर्थात् संस्कृत-विद्यायाः पुनः स्थापनार्थं जाता अस्ति इति अद्य अत्र आगत्य विलोकितुम् अपारयम् ।

अमुना अग्रे एतदपि भणितं यत् छात्राः संस्कृतं संस्कृतिं च प्रति नैजम् उत्तरदायित्वं अभिज्ञाय संस्कृत-भाषायां निहित-ज्ञान-परम्पराणां रक्षण-पूर्वकं विश्व-भाल-भूतं देशं पुनः गौरवास्पदं कुर्युः। सर्वे छात्राः संस्कृतस्य नीति-वचनेषु प्रतिपादितानाम् अनुशासन-बिन्दूनां मानवीयताधायक-तत्त्वानां च



पालनं कुर्वन्तः राष्ट्रस्य विकासे सहायकाः सिद्धाः भवेयुः। अथ च अनेन प्रतिपादितं यत् राष्ट्रस्य सर्वविध-विकासार्थं श्रेष्ठः मार्गः संस्कृते निहितं ज्ञानमेव वर्तते। अमुना अत्र आयोजिते अन्तर्विद्यालय-स्तरीय प्रतिस्पर्धा-विषये अतितरां प्रसन्नतापि व्यक्तीकृता। समस्त-कार्यक्रमस्य आयोजनम् आदरणीयस्य प्रधानाचार्यस्य श्रीयुतस्य लक्षवीर-सहगल-वर्यस्य समभिप्रेरणाभिः, आदरणीयायाः उपप्रधानाचार्यायाः श्रीयुतायाः विनीता-धवन-महोदयायाः च मार्ग-दर्शनेन मुख्याध्यापिकायाः श्रीयुतायाः नीता निझारा-वार्यायाः समन्वयकत्वेन च सफलितं जातम्। एतस्याः प्रतिस्पर्धायाः सफलायोजने समग्र-सज्जतादिकं वरिष्ठ-संस्कृत-शिक्षिका डॉ. ज्योत्स्ना श्रीवास्तव-वर्या विद्यालयस्य वरिष्ठ-विभागस्य संस्कृत-शिक्षकश्च समवाप्तसाहित्याकादेमीयुवपुरस्कारः डॉ. युवराजः भट्टराईवर्यः सम्भालितवन्तौ।









अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।